भाट्टदीपिकाद्वितीयाध्यायः

४२५३

भट्ट दीपका
१००

द्वितीयाध्यायः

भा॰
१

श्रीगणेशाय नमः॥ ॥भावार्थः॥ ॥एवं धर्मप्रमाणेषु निरूपितेषु अधुना तत्स्वरूपं निरूप्यते। यद्य
पि च तदपि एतावत्प्रमाणप्रतिपाद्यत्वेन रूपेणावबुद्धमेव तथापि एकत्वानेकत्वादिरूपेणावबुद्धत्वा
दिह तेन रूपेण निरूप्यते। अत्र च शाब्दांतरादि षट्प्रमाणक भावनाभेद एवाध्यायार्थः। धात्वर्थ
भेदस्तु तत्सिध्यर्थः क्वाचित्को निरूप्यते अपूर्वभेदोपि फलत्वेनेति न ताव ध्यायार्थौ। फलीभूता
पूर्वभेदोपि अपूर्वभेदोपि अपूर्वसाधनभेदाधीन इति तत्साधनजिज्ञासायां स्वर्गादिसाधनस्यैवादां
तरव्यापाररूपापूर्वं प्रतिसाधनत्वात् स्वर्गादिफलं प्रति किं धात्वर्थस्य करणत्वं उतो। पपदार्थस्य सोमा
देरपीति चिंतायां प्राथमिकभावनान्वयस्य तावत्सिद्धांतिनोपि संमतत्वादोत्तरकालिकः फला
न्वयोपि सर्वेषामेवेति प्राप्ते सकरणत्वे अनेकादृष्टकल्पनाप्रसंगादेकस्यैव फलनिरूपिताक
रणता। अन्येषां तु दृष्टविधयैव करणार्थता। तदत्र धात्वर्थस्यैव करणत्वे सोमादीनां तज्जनकत्वे

३

नैवदृष्टार्थता॰सोमादीनां करणत्वेच धात्वर्थस्याश्रयविधयैवदृष्टार्थतेतिनानेकादृष्टकल्पना॥ ॥
एवंस्थितेविशेषजिज्ञासायांसोमादेरेव फलकरणत्वंतस्य सिद्धत्वेन योग्यतारूपलिंगात्।तृतीयायाः
करणत्वेशक्तत्वेनकारकश्रुतेरेकपदोपात्तत्वरूपपदश्रुत्यपेक्षयाबलीयस्त्वाच्च फलान्वयेपदश्रुतेर
प्यभावाच्च।अतएवयागादिधात्वर्थःसोमाद्यर्थएव॰ नच तदर्थत्वे अदृष्टकल्पना।अग्निहोत्रहोमेन
दधिनिष्टकरणतासंपादनवद्यागेनादृष्टमंतरेणैवसोमनिष्टकरणतासंपादनेनयागस्यसोमांग
त्वोपपत्तेरितिप्राप्तेपदश्रुत्यायागस्यैवफलकरणत्वं।यद्यपिचफलान्वयेनसातथापिप्राथमिक
भावनान्वयेयस्ययत्प्रमाणंतत्प्रतबलवत्वस्यतस्यामावश्यस्यपामकिंचित्करत्वेपिपार्ष्टिकफलान्
येतस्यनिर्णायकत्वात्॰अतश्चप्राथमिकभावनान्वयेविद्यमानापदश्रुतिःफलान्वयेनिर्णायिकाःनचत
स्याःकारकश्रुत्यपेक्षयादौर्बल्यं॰ लाक्षणिकत्वेपियागकरणत्वस्यसोमकरणत्वान्वयात्प्राकृभावनाया

भा० २

मन्वितत्वेनदेतेन्वयस्यप्राथम्यात्ः अन्यथातिङंतपदस्यपरिपूर्णत्वाभावेनतदुपस्थापितभावनायां सोमस्याप्यन्वयानुपपत्तेः। परिपूर्णपदंपदांतरेणान्वेतीतिन्यायात्ः नचप्रथमावगतस्यापिकल्प्यास्यश्रौत्तरककालिकेनबाधः। उपजीव्यत्वादितियागः फलसाधनंसोमोयागोर्थइतिसिद्धंप्रयोजनंसोमापचास्मे प्रतिनिध्युपादानंपूर्वपक्षेसिद्धांतेतुतत्॥ ॥नन्विदंधात्वर्थातिरिक्तभावनासत्वेभवेन्नतुतस्यांप्रमाणमस्तिः ध्यानंनामेवविक्षित्यादिफलस्वतन्त्रप्रयोजकव्यापारमात्रेफूत्कारादौपत्नादौचणक्तत्वात्ः अतोपत्नादिरूपभावनायाः अपिधातुवाच्यत्वाद्धात्वर्थएवपक्रियारूपेसकललकारकान्वयोनतुयागस्यपदश्रुत्या फलकरणत्वमितिचेत्। पचतिपाकंकरोतिपाकेयततइतिपाकाख्यथकृविव्रीयमाणपत्नादेःपच्यर्थत्वानुपपत्तेः। नचघयंअंतपाकशब्दस्यफलएवशक्तत्वात्यथकृविवरणोपपत्तिः। व्यापारविगमेपिफलदशायांपाकोविद्यतइतिप्रयोगापत्तेस्तस्यापिव्यापारवाचित्वावश्यंभावात्ः अतोभासमा

२

नोयत्नादिस्तिङ्वाच्य एव॰ अत एव धातुवाच्यमपि साक्षात्फलजनकफूत्कारादिव्यापारवृत्तिपाक
त्वादिकमेव॰ तच्च जातिरखण्डोपाधिर्वेत्यन्यदेतत्॰ तज्जनकयत्नादिकं तु आख्यातवाच्यमेतत्॰ तत्र ण
त्कतावच्छेदकं तु करोतिविवृतप्रमाणतिपूत्वादिकं लाघवात्तिपूत्वादिकमेव वा॰ ननु स्थानिलत्वं तदुप
स्थापकादेशविशेषाणां पदज्ञानविष्टकारणतावच्छेदककोटिप्रवेशे गुरुभूतकारणतावच्छेदकघटिता
नंतकार्यकारणभावकल्पनापत्तेः। अप्रवेशे यथाकथंचिदुपस्थितलकारादपि भावनोपस्थित्याप
त्तेः। ण्यत्कतावच्छेदकं तु फलोद्देश्यकधात्वर्थातिरिक्तव्यापारत्वं॰ फलं च क्वचिद्धात्वर्थः क्वचित्स्वर्गादि
ति यथाविवक्षं॰ एवं च रथो गच्छतीत्यादौ न लक्षणा गमनानुकूलव्यापारस्यैवाख्यातार्थत्वात् इति पार्थसा
रथिः। वस्तुतस्तु यत्नत्वमेव शक्यतावच्छेदकं लाघवात्। तद्वा धेनुसर्वत्राश्रयतादौ लक्षणा॰ यत्नस्यैव
चाख्यातेयात्तस्य नित्यं कर्मसाकांक्षत्वं करोतिपर्यायत्वादेककर्मकत्वं फलभवनानुकूलत्वाच्च अर्थभा

भा० ३ 3

वनात्वंदृष्टव्यं॰ इयं चाख्यातोपात्ताभावनैव मुख्यविशेष्या॰ तद्व्यतिरेकेणेतरपदार्थान्वयापर्यवसाना
त्॰ तस्यामेव चाख्यातोपात्तायां त्काप्रत्ययाद्युपात्तायां वा योग्यताद्यनुसारेण निपातोपसर्गप्रातिपदिका
तिरिक्तशब्दगम्योर्थः सुबुपात्तलिंगसंख्याव्यतिरिक्तोर्थस्तस्य सर्वस्यापि प्रकारतयान्वयः। निपातो
पसर्गयोस्तु क्रियासमभिव्याहारादौ सति तयान्वयोन्यसमभिव्याहारादावन्येनापि॰ प्रातिपदिका
र्थेपि सुबर्थैकरणत्वादौ। तद्धितसमासादिस्थलं उ प्रातिपदिकावयवार्थानां तु यत्र कारकतासंबंधेन त
द्धितसमासादिवृत्तिर्यथा आग्नेय इत्यादौ तत्राग्नेर्देवतात्वाश्रावनायामेवान्वयो न तु तद्धितोपात्ते द्रव्ये॰
स तु पार्ष्टिक एव॰ यत्र तु कारकतातिरिक्तसंबंधेन सा तत्र परस्परान्वयोपि यथा श्वाभिधानीमित्यादौ
। एवं सुबुपात्तलिंगसंख्ययोः समानाभिधानश्रुत्या सुबर्थैकरणत्वादावेवान्वयः॥ तद्व्यतिरिक्तपदा
र्थमात्रस्य तु सुबर्थकरणत्वादेर्धात्वर्थस्य कर्तुस्तदेकत्वादेश्च कालादेर्लिङाद्यर्थस्य विध्यादेर्लिङाद्यर्थ ३

स्य च तर्त्वे स्ये वलिंगान न्वपि भावनावाचिपदोपस्थाप्यायां भावनायामेवान्वयः। अत एव भावनादिष
दोपस्थापितायां तस्यां नान्वयः। आख्यातेन त्का दिनावोपास्थितायां तु भवत्येवान्वयः प्रकारतया प्र
कारताघटकाः संबंधाश्च सर्वे यथायथं पार्ष्टिकान्वयबोधवेलायामवगम्यमानाः कौ स्तुभ एव द्रष्टव्याः। तस्मा
त्सिद्धा आख्यातवाच्या आर्थी भावना॰ तस्यां च स्वर्गादि र्भाव्यं॰ धात्वर्थश्च करणं॰ सोमादिकं नु करणानुग्राह
कत्वादिति कर्त्तव्यतेति सिद्धं॥ ॥ चोदना॥ ॥ धात्वर्थादेवापूर्वमिति स्थिते पूर्वमेवास्ति न वेति चिंतायां
त्कृतयागध्वंस द्वारेणैव क्षणिकस्यापि यागस्य स्वर्गसाधनत्वोपपत्तेर्नापूर्वकल्पनं गौरवापत्तेः। न च नि
त्यत्वाद् ध्वंसस्य धर्मः क्षरति कीर्त्तनात्प्रायश्चित्तेन नश्यंति पापानि सुभहांत्यपीति कीर्त्तनप्रायश्चित्तनाश्य
त्वानुपपत्तिः। कीर्त्तनादेः फलोत्पत्ति प्रतिबंधकत्वांगाकारेण तदनाशकत्वात्। कीर्त्तनात्यंताभावविशि
ष्टज्योतिष्टोमव्यक्तित्वेन कारणत्वकल्पनाद्वा न कश्चिद्दोषः। अतो नापूर्वे किंचित्प्रमाणमस्तीति प्रा

प्रेक्षरतिनश्यत्सोर्नाशावाचिनोर्भवन्मतेलक्षणापत्तेर्नाशयोग्यमपूर्वमेवकल्पते।गौरवस्यफलमुखत्वेना
दोषत्वात्. अतश्चप्रधानेनस्वर्गादिफलेजननीये अपूर्वमवांतरव्यापारः।अंगेनचप्रधानादिनिष्ठफ
लाघतुकूलयोग्यतारूपेस्वफलेजननीयेतदवांतरव्यापारःस्वचफलवलादात्मनिष्ठः।अवांतरव्या
पारत्वादेवचनयागादेरन्यथासिद्धिः।तदंत्रयपत्रेकमेवप्रधानंतत्रापूर्वोत्तरांगसहितात्तस्मादपूर्वोत्पत्तेः
प्रधानाव्यवहितमेकमुत्पत्त्यपूर्वंतेनचसर्वांगांतेपरमापूर्वमपरमितिद्वेअपूर्वे. एवंप्रधानभेदेपित्र
तिप्रधानंउत्पत्त्यपूर्वभेदःपरमापूर्वंत्वेकमितिज्ञेयं. दर्शपूर्णमासयोस्तुपौर्णमास्यांपूर्णमास्यांपूर्ण
यजेतामावास्यायाममावास्ययायजेतेतिवाक्यद्वयोक्तयागत्रयेप्रकरणतानांत्रिकांतरनिरपेक्षाणांसाहित्या
वगतेःसाहित्यस्यचैककार्यनि[illegible]पितत्वंविनानुपपत्तेः.उत्पत्तिसमुदायंसमुदायापूर्वमपरं तेनचपरमा
पूर्वमितिनवापूर्वीसिद्धिः।एवमन्यत्रापिचातुर्मास्यद्वादशाहादिषुअपूर्वकल्पनाज्ञेया. अंगेषुतुसन्नि

पत्योपकारकांगजन्यापूर्वाणां प्रधानएवोत्पत्त्यपूर्वजननानुकूलयोग्यताजननेउपयोगः। अंतिमप्रधा
नगतयोग्यतायाश्च नाशः। आराडुपकारकजन्यानां तु उत्पत्त्यपूर्वनिष्ठतदव्यवहितकार्यजननानु
कूलयोग्यताजननेउपयोगः। अव्यवहितं च कार्यं समुदायापूर्वसत्वे तदेव तदभावे परमापूर्वं स्वर्गाद्ये
व वा ज्ञेयं। अंतिमयोग्यतोत्पत्तौ च नाशः। यदि तु परमापूर्वेण न तथा किंचित्प्रमाणमित्याशंक्येत ततो मा
स्तु तत्। अंगानां तु आराडुपकारकाणामुत्पत्त्यपूर्व एव समुदायापूर्वाभावे फलानुकूलयोग्यता
जननमेव कार्यमस्तु। सर्वथा सिद्धमपूर्वं॥ ॥तानिहैधं॥ ॥व्रीहीनवहंतीत्यादौ अपूर्ववदेवावघात
स्य फलभावनाकरणत्वमविवादं। तच्च फलं न व्रीहयः। अजन्यत्वात्। नापि वैतुष्यं। तज्जनकत्वस्य
लोकसिद्धत्वेनाविधेयत्वात्। नापि पक्षे दलनादेरप्यर्थप्राप्तत्वेन तद्व्यावृत्तिफलको नियमः। तस्यापि वै
फल्यात्। न च तस्यादृष्टार्थत्वं। अदृष्टस्यावश्यकल्पनीयत्वे शाब्दावघातादेव तत्कल्पनौचित्यात्। अतो

दृष्टार्थमेवावघातः। तदपि चादृष्टं न व्रीहिनिष्ठं। तत्तावच्छिन्नं प्रति आत्मत्वेन समवाईकारणत्वात्
अतः पूर्ववदेव व्रीहय एवावघातार्था इति व्रीहिविशिष्टोवघात एवादृष्टार्थमारादुपकारकत्वेन वि-
धीयत इति प्राप्ते दृष्टसंभवेऽदृष्टस्यान्याय्यत्वाद्वितुषीभाव एवावघातफलं। न च तस्याक्षेपादेव प्रा-
प्तत्वेन विधिवैयर्थ्यं दलनादिरूपोपायान्तरव्यावृत्तिफलकनियमस्यैवावघाताश्रितस्यादृष्टार्थं विधेय-
त्वात्। अत एव कृष्णलचरो अवघाताभावे तस्य लोपः। वक्ष्यते तस्य— तस्यावघातस्यैवाक्षेपतः प्र-
वृत्तत्वात् वितुषीभावार्थं विधेयत्वं। अतश्चाक्षेपप्रतिबंधाद्दलनादिव्यावृत्तिफलके नियमः फलं वैतुष्यस्य
च दलनेनापि ज्ञाप्यमानत्वाद्वैयर्थ्यशंका तु अवघातादेव व्रीहिनिष्ठादृष्टस्याप्युत्पत्तिकल्पनान्निराकर्त-
व्या। न तदृष्टस्य च जन्यत्वमात्रं लाघवात् कल्प्यते न प्रयोजकत्वमपि। दृष्टरूपे वैतुष्ये द्वत्वकल्पनात्। अतः
कृष्णलचरौ वैतुष्याभावेपि न लोपः। आर्थिकविध्यंतरकल्पनाच्चनानेकादेश्यता। तत्तदृष्टस्य च द्वितीयादि

धर्मिग्राहकप्रमाणेन व्रीह्यादिनिष्ठत्वस्यैवावगतेस्तत्वेनैव समवायीकारणतानात्मत्वेन. अतश्चावघा
तस्यादृष्टवितुषीभावोभयद्वारा अपूर्वसाधनीभूतव्रीह्युद्देशेन विधानात्सिद्धं संस्कारकर्मत्वं. प्रयो
जनं पात्रगार्थव्रीह्यपेक्षया — ह्यंतरमवघातार्थमुपादेयं पूर्वपक्षेसिद्धांतेनेति॥ ॥धर्ममात्रे॥ ॥व्रीहीन्प्रो
क्षति स्रुचः संमार्ष्टीत्यादौ दृष्टोपकारकत्वासंभवान्न द्वितीयाया असाध्यत्ववत्करणत्वेपि सक्तून् जुहोति
वल्वजान् शिखंउकान्कुर्वित्यादौ प्रयोगदर्शनात्पूर्वाधिकरणपूर्वपक्षवदर्थकर्मत्वमेव. वल्वजा
नां हि करोतेर्हि कर्मकत्वापत्तेर्न साध्यत्वं. अतः करणत्वमपि द्वितीयार्थः अतश्च व्रीहिकरणकप्रोक्ष
णमेवादृष्टार्थं विधीयत इति प्राप्ते कर्मणि द्वितीयेत्यनुशासनाद्दृष्टं करोतीत्यादिप्रयोगाच्च साध्यत्व
मेव द्वितीयार्थो न करणत्वं. अनेकशक्तिकल्पनप्रसंगात्. कर्मत्वं च कर्तुरीप्सिततमं कर्मेति सूत्रा
न्नेप्सितत्वरूपमेव. अपितु तथायुक्तं चानीप्सितमिति सूत्रादीप्सितानीप्सितसाधारणसाध्यत्वमे

व. यथा चैवं सति न स्तन्त्रद्वयवैयर्थ्यं तथा कौस्तुभ एव प्रदर्शितं. अतस्तु व्रीहीणां द्वितीयया सा
ध्यत्वाभिधानात्त्यागांगत्वावगमे न चेप्सितत्वप्रतीतेस्तदुद्देशेन प्रोक्षणं विधीयते। दृष्टद्वारासंभ
वे पि चादृष्टमेव द्वारं व्रीहिनिष्ठं कल्प्यते। अत एव यत्र नोपयोगः क्रूप्तः न वा कल्प्य पि तु शक्यो यथा सक्तु
षु तत्र द्वितीयया करणत्वलक्षणा मंगीकृत्य सक्तु विशिष्टहोमस्यैव अदृष्टार्थं विधानं न चानीप्सि
त कर्मत्वेनाप्यन्वयोपपत्तेर्न करणत्वलक्षणेति चाच्यं। तथा सति अदृष्टोपकारस्यापि भावनायां कर्म
त्वे नान्वयावश्यंभावे तस्याद्विकर्मकत्वापत्त्योद्देश्यानेकत्वनिमित्तवाक्यभेदापत्तेः। अतः सक्तुकरण
कहोमस्यारादुपकारकत्वे पि प्रोक्षणादेः संनिपत्योपकारकत्वमेव प्रयोजनं पूर्ववत्॥ ॥स्रुक्तनशा
स्त्रयोः॥ ॥आज्यैः स्तुवते प्रौगं शंसतीत्यादि स्तोत्रशास्त्राणां यागीयदेवतादिप्रकाशकतया आन्य मंत्र
वदेव दृष्टार्थत्वादवघातादिवदेव संनिपत्योपकारकत्वमिति प्राप्ते लोके गुणिनिष्ठगुणतात्पर्यकाभि

धानस्यैवस्तुतिपदवाच्यत्वेनप्रसिद्धत्वात्प्रगीताप्रगीतमंत्रसाध्यगुणिनिष्ठगुणतात्पर्यकाभि
धानस्यचस्तोत्रशस्त्रपदवाच्यत्वात्तेषांगुणिप्रकाशनतात्पर्यकत्वासंभवेनैषांमंत्राणांगुणिप्रका
शनार्थत्वं·अपितुगुणप्रकाशनरूपाणांस्तोत्रशस्त्राणामात्मनिष्ठादृष्टार्थतयाआराडुपकारत्वमेव·
नचप्रयाजशेषाभिधारणन्यायेनदृष्टार्थत्वानुरोधेनलक्षणयागुणिप्रकाशनरूपत्वं।लिंगाद्देवताद
कृत्वोपपत्तौविधिवैयर्थ्यात्·एवंचमाहेंद्रयागसन्निधौऐंद्रीस्तुतिरुपपन्नाभवति।इतरथाशब्द
समभिव्याहृतदेवताविधिगतशब्देनैवनिगमेषुवक्तव्येतिमहेंद्रेणेंद्रशब्देनशक्यतेप्रकाशयितुं·अ
तोपवेंद्रएवदेवतात्रोत्कर्षापत्तिः।सामान्यसंबंधबोधकप्रमाणभावेनवामनोतास्थाग्निशब्दवल्ल
क्षणयाइंद्रपदेनमहेंद्रस्यैवप्रकाशनापत्तिः।तस्मात्प्रधानकर्मणीस्तोत्रशस्त्रे॥ ॥विधिमंत्रयोः॥ ॥
गुणकर्मप्रधानकर्मविधायकाख्यातद्वयेनिरूपितेप्रसंगादभिधायकंतृतीयमाख्यातंनिरूप्यते·मंत्रग

तानांब्राह्मणगतानांचयच्छब्दादिसमभिव्याहृतानामाख्यातानामपिविधायकत्वं॰सत्यामपिचप्रमा
णांतरेणप्राप्तौअभ्यासात्कर्मभेदइतिप्राप्तेदेवांश्चयाभिर्यजतेयस्योभयंहविरार्त्तिमार्छेदित्यादौयच्छब्द
स्यप्राप्तिद्योतकत्वेनस्वविषयेअज्ञातज्ञापनरूपविधिप्रतिबंधकत्वंस्पष्टं॰एवंअग्नीदग्नीन्विहरे
त्यादौसंबोधनविभक्तेरभिमुखश्रोतृमात्रविषयायाअभिमुखानभिमुखसाधारणविधिविरोधि
त्वं॰दामीत्यादेरुत्तमपुरुषस्यचपरप्रवर्त्तनरूपविधिविरोधित्वं॰अतोविधायकत्वासंभवान्मंत्रगतानां
स्मारकत्वंब्राह्मणगतानांनिमित्तादिप्रतिपादकत्वंलक्षणयेतिद्रष्टव्यं॥ ॥तच्चोदकेषु॥ ॥मंत्रप्रसं
गादहेबुध्नियमंत्रंमेगोपायेतिवेदप्रयुक्तमंत्रशब्दार्थनिर्णयायतल्लक्षणमुच्यते।यत्राभियुक्ता
नांमंत्रपदवाच्यत्वप्रकारिकारिकाउपस्थितिविषयतासमंतु।वाच्यतावच्छेदकंचमंत्रत्वमखंडोपा
धिर्वेदत्ववत्॥ ॥शेषे॥ ॥एतद्ब्राह्मणानिपंचहवींषीतिवेदप्रयुक्तब्राह्मणशब्दार्थपरिज्ञानार्थंतल्ल

क्षणमापन्नसंगादेव॰मंत्रातिरिक्तवेदत्वमेवब्राह्मणत्वं॥ ॥अनाम्नातेषु॥ ॥ऊहप्रवरनामधे
यानांसत्यपिप्रयोगकालेअर्थस्मरणार्थमुच्चार्यत्वे मंत्रपदैकवाक्यत्वेचस्वरूपेणवेदेअपठितत्वा
दभियुक्तप्रसिध्यविषयत्वेननैषांमंत्रत्वं॰अतश्चनैषांभ्रेषेमंत्रभ्रेषनिमित्तंप्रायश्चित्तं।अपितुअंग
भ्रेषनिमित्तकमेव॥ ॥तेषामृक्॥ ॥मंत्रत्वादौव्यापकधर्मेनिरूपितेतत्प्रसंगादेवतदवांतरधर्मो
ऋक्त्वादिःऋचःसामानियजूंषीतिवेदप्रयुक्तऋगादिपदार्थपरिज्ञानार्थंनिरूप्यते॰पादव्यवस्थावन्मं
त्रत्वंऋक्त्वं॥ ॥गीतिषु॥ ॥मंत्रत्वसमानाधिकरणगीतित्वंसामत्वं॥ ॥शेषे॥ ॥ऋक्सामभिन्न
मंत्रत्वंयजुष्टं॰स्तोभाक्षरेष्वपितत्वान्नातिव्याप्तिः॥ ॥निगदोवा॥ ॥निगदसंज्ञकानांमंत्राणांसंज्ञाभेदा
दुपांशुयजुषाउच्चैर्निगदेनेतिविप्रतिषिद्धधर्मभेदाच्चभेदोयजुर्भ्यइतिप्राप्तेऋचःसामानियजूंषीतिवेदे
त्रयाणामेवमंत्रभेदानांसंकीर्तनान्मंत्रएवखल्वयंनिगदभूतोभवतितस्माद्यजुरितिचलिंगान्निग

भा० ८

दानां यजुष्ट्वमेव। संज्ञा तु ब्राह्मणपरिव्राजकन्यायेनाभेदेप्युपपन्ना। निगदत्वं च यजुष्ट्वावान्तरधर्मो न तु नितरां उ
पांशुस्वरातिरिक्तस्वरेणाध्यायमानत्वं। नमः प्रवक्त्रे इत्यादिनिगदेषु उपांशुपठ्यमाने ष्वव्याप्तेः। न च धर्मभे
दाद्भेदः विशेषविहितेनोच्चैष्ट्वेन सामान्यविहितस्योपांशुत्वस्यान्यपरत्वावसायात्। उपांशु यजुषेत्यस्य वे
दोपक्रमानुरोधेन यजुर्वेदविहितकर्ममात्रे उपांशुत्वविधायकत्वस्य वक्ष्यमाणत्वेन भवन्मतेपि संको
चस्यावश्यकत्वाच्च। न चैवमुपक्रमस्थेन यजुःपदे वेदलक्षणावन्निगदपदेपि यजुर्वेदलक्षणापत्तेरेकस्मिन्क
र्मणि धर्मद्वयविकल्पापत्तिः। वायोर्यजुर्वेद इत्युपक्रमस्य यजुःपद एव लक्षणा नान्यत्र यस्माह कृत्वात्। अन्य
थावार्योर्निगदवेद इत्यपि किन्नावक्ष्यत्। अतश्चोच्चैर्निगदेनेति स्वतंत्र एव निरर्थवादकोपमुच्चैष्ट्वनिय
मविधिर्विशेषविहितातिरिक्तनिगदोद्देशेन। तेषु हि परप्रत्यापनरूपकार्यवशेनोपांशुत्वनिवृत्तावपि मं
द्राधनेकस्वरप्राप्तेरुच्चैष्ट्वनियमो नानुपपन्नः। अतो निगदविशेषयजुर्भ्रेषप्रायश्चित्तं आश्विताद्दोपारिप्लव

८

ग्रंमनंवा·॥ ॥अर्थैकत्वात्॥ ॥यत्तु छंपादवस्तुपदेषु वाक्यत्वं पर्याप्तं तावत्सु पर्याप्तं न तु वाक्यसमूहे त
स्य विनियोगानर्हत्वात्· वाक्यत्वं च पदत्रार्थैकत्वं विभज्यमानसाकांक्षत्वं च तावत्सु· अर्थैकत्वं च भिन्नप्र
तीतिविषयानेकमुख्यविशेष्यराहित्यं अन्यस्य दुर्वचत्वात्· अस्ति च· गामानयेत्यादौ मुख्यविशेष्यभूता
पाभावनायाएकत्वान्न तु· दर्शपूर्णमासाभ्यां न होमादिवाक्येषु च भावनानामनेकासामपि भिन्नप्रती
तिविषयत्वाभावात्· व्रीहिपववाक्ययोभंगो वां विभजतीत्यादौ च सत्यपि भिन्नप्रतीतिविषयत्वे मुख्यवि
शेष्यायाभावनायाएकत्वादर्थैकत्वं· अतस्तत्रैकवाक्यत्वं व्याहन्यर्थं द्वितीयं अनीयमानयोः पदार्थयोरन
न्वये अनिवृत्ताकांक्षत्वरूपं विशेषणं· स्योनं ते सदनं कृणोमि तस्मिन्सीदेत्यत्रानन्वये साकांक्षत्वे पि भिन्न
वाक्यत्वादाद्यं विशेषणं॥ ॥समेषु॥ ॥यत्र तु नोक्तविधं विभज्यमानसाकांक्षत्वं यथेषे त्वा ऊर्जे त्वेत्यन
योर्यथा वा आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामित्यादौ तत्र सत्यप्यर्थैकत्वे भंगो वा मित्यादिवेत्रभे

दः किमुत यदा विनियोगानुसारेणार्थभेद एव प्रमाणवान् तदा मंत्रैकत्वे प्रमाणाभाव एव· अत्र हि इषे त्वे
ति शाखां छिनत्ति ऊर्जे त्वेत्युन्मार्ष्टीति विनियोगभेदादिषे त्वा छिनद्मीति क्रियापदाध्याहारेण भिन्नभे
व मुख्य विशेष्यं· एवमूर्जे त्वोन्मार्ज्मीति· एवं कृत्तीर्वाचयतीति बहुवचनात्कृत्तिभेदावगमेनार्थभे
दः। अतश्चात्र यजुर्भेद इति पूर्वोक्तमत्रोदाहरणमात्रं॥ ॥अनुषंगः॥ ॥यत्र बहूनां शेषापेक्षि
णामाद्यस्यानंतरं शेषः समाम्नायते यथा या ते अग्ने अयाशयेत्यस्यानंतरं तनूर्वर्षिष्ठेत्यादिः शेषः। उ
त्तरौ मंत्रौ या ते अग्ने रजाशया या ते अग्ने हराशयेति· तत्रोत्तरयोः शेषापेक्षिणोरयमेव शेषोनुषज्यते न
तु लौकिको ध्याह्रियते अश्रुतत्वात्· न चासावेकत्र निबद्धोन्यत्र नेतुं न शक्यः। सर्वार्थत्वेनाम्नानात्·
न चाद्यस्यानंतरमपेक्षितदेशोपस्थितत्वात्तदर्थमाम्नानं शंक्यं· आकांक्षायोग्यतयोरविशिष्टत्वादासत्ते
रपि असंबंधिपदाव्यवधानरूपायाः सर्वत्राविशिष्टत्वाच्च· न हि आनंतर्यमेव संबंधकारणं तदभावेपि श्रा

द्बोधस्यासंबंधिपदव्यवधानाभावेऽनानुभविकत्वात्. सर्वाव्यवधानस्यासकृत्याऽशक्यतयाऽऽकां
क्षादित्रयेणैवचसर्वार्थत्वज्ञानोपपत्तेरावृत्तपाठस्यसर्वांतपाठस्यचापादपितुमशक्यत्वादपेक्षितदेश
पाठस्यचलिंगेनैवज्ञातुंशक्यत्वादाम्नानस्यसर्वार्थत्वावगतेरनुषंगएव. नचैवंअव्यवधानस्याकारणत्वे
पदश्रुत्यायोगस्यैवकारणत्वानापत्तिः। तस्याकारणत्वेपिसंदेहेनियामकत्वमात्रांगीकारात्. प्रकृतेतु
आकांक्षादिवशेनसर्वार्थत्वस्यैवप्रतीतोर्नियामकाकांक्षाभावेनानुषंगएवयुक्तः। अतश्चतद्द्वेषेपिय
जुर्भेषप्रायश्चित्तंदि.॥ ॥एवंयत्रनिराकांक्षाणामेवशेषिणांवक्तृनामंतेसापेक्षःशेषःसमाम्नातोयथाचि
त्पतिस्त्वापुनातुवाक्पतिस्त्वापुनातुदेवस्त्वासवितापुनात्वित्येतेषामंतेअच्छिद्रेणपवित्रेणेतितत्रापिसंनि
धियोग्यत्वयोरविशेषात्सर्वत्रानुषंगः। नचोत्थाप्याकांक्षायाएकसंबंधनेनैवचरितार्थत्वादानंतर्यस्यनिया
मकत्वोपपत्तिः। शेषाकांक्षयाकांक्षोत्थापनेपिप्रधानत्वाच्छेषिणांविनिगमनाविरहेणसर्वेषामेवशेषत्वा

भा० १० 10

हकत्वावगतेरानंतर्यस्यानियामकत्वात्. अतएव अनेकहविष्कविकृतिसंन्निधिपठितोपहोमानांसर्वा
र्थत्वमेव. अतश्च मुखनाभिगुल्फप्रदेशयावनार्थेषु एतेषु मंत्रेषु शेषोप्यनुषज्यते प्रतिप्रधानावृत्तिन्याया
त्॥ ॥व्यवायात्॥ ॥यत्र तु असंबंधिपदव्यवधानं यथा संतेवायुर्वातेनगच्छतां संयजत्रैरंगानि संयज्ञप
तिराशिषेत्यत्र गच्छतामित्यस्याशिषेत्यत्र नानुषंगः। अंगानीत्यत्र एकवचनांतस्यानन्वयेन बहुवचनां
तस्यैव गच्छंतामित्यस्याध्याहारावश्यंभावात्. बस्तकत्सक्त बहुवचनस्यैवाध्याहारेण गमिधातोरनुषंगए
वेति एकवचनस्यैवानुषंगप्रसुदाहरणमिदं॥ ॥इतिश्रीखंडदेवकृतौ भाट्टदीपिकायां द्वितीयस्या
ध्यायप्रथमः पादः॥ ॥शब्दांतरे॥ ॥भावनाभेदफलीभूतापूर्वभेदोपयोगिभावार्थाधिकरणरूपोपो
द्धातप्रसक्तानुप्रसक्तादेः समाप्तेधुना शब्दांतराद्भेदोभिधीयते. ज्योतिष्टोमादिप्रकरणस्थानां सोमेन यजे
त हिरण्यमात्रेयाय ददाति दाक्षिणानि जुहोतीत्यादीनां विभिन्नधात्वर्थानां भावनाभेदबोधकत्वमस्तिन

वेति चिंतायां ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यनेन स्वर्गकर्मिकभावनामात्रे लाघवाद्विहिते तदनुवादेन
सोमादिवाक्यैः सोमादिविशिष्टयागादिविधानात्सर्वेषां चोत्पन्नशिष्टत्वेन गुणन्यायाभावान्न भावनाभेदः।
न चानेकधात्वर्थानामेकजातीययत्नजन्यत्वासंभवः। बाधकाभावात्। न च प्रकृत्यर्थान्वितस्वार्थाभिधा
यकत्वात्प्रत्ययानां फलवाक्यस्थेनाख्यातेन धात्वर्थानवच्छिन्नशुद्धभावनाविधानानुपपत्तिः। आख्याते
न धात्वर्थावच्छिन्नभावनाभिधानेपि तदंशे विधिव्यापाराभावात्। अत एव गुणफलसंबंधस्थले धात्वर्थानुवा
देपि भावनामात्रविधानं। अत एव च फलवाक्योपात्तः प्रकृतसर्वधात्वर्थोपलक्षणं। ज्योतिष्टोमपदं च छत्रि
न्यायेन सर्वनामधेयमिति प्राप्ते कार्यमात्रवृत्तिधर्मस्य विजातीययागत्वादेः कंचित्प्रतिकार्यतावच्छेदक
त्वावश्यकत्वेन तदवच्छिन्नं प्रतिउपस्थितस्य यत्नस्यैव वैजात्यपरिकल्पनया विजातीययत्नत्वेनैव का
रणत्वं। अत अत्र तिधात्वर्थवैजात्यं भावनावैजात्यसिद्धिः। विभिन्नधात्वर्थकत्वमेव च शब्दांतरत्वं। अत एव

तिस्रश्चाहुतीर्जुहोतीत्यत्रसंख्यया होमभेदेसिद्धे शब्दांतरादेवोक्तविधाद्भावनाभेदः। नतुमन्त्रलोक्तादि
तिध्येयं। किंच प्राप्तभावनानुवादेनसोमयागाद्यनेकविधानेवाक्यभेदापत्तेस्तत्र गुणाधात्वर्थोभयवि
शिष्टभावनाविधानमेवतत्र द्वाक्येनंगीकर्त्तव्यं· तत्रचचातुर्थिकन्यायेनज्योतिष्टोमपदाभिधेयस्य
सोमयागस्यैवस्वर्गवाक्येनफलसंबंधोन्येषांतुतदंगत्वं· नचस्वर्गवाक्यएवयागभावनोत्पत्तिपू
र्वकंफलसंबंधः सोमवाक्ये नचसोममात्रविधानमितिवाच्यं· स्वर्गवाक्येराजसूयन्यायेनेष्टिप
शुयागानामेवफलसंबंधापत्तौयागांतरविधाने प्रमाणाभावात्· ततश्चपश्चाद्यवरुद्धेसोमविध्यनु
पपत्तेःसोमवाक्येकर्मांतरविध्यवश्यंभावः प्रयोजनंसोमयागमात्रप्राधान्यं॥ ॥एकस्यैवं॥ ॥द
र्शपूर्णमासप्रकरणास्थेसमिधोयजतितनूनपातंयजतिइडोयजतिवर्हिर्यजतिस्वाहाकारंप्र
जीत्यौतीदोयागस्यापिप्रत्यभिज्ञायमानत्वेनाभेदान्नभावनाभेदः। नचाभ्यासाद्भेदोयागस्य· अ

भ्यासस्यैकत्वसाधकत्वेनविरुद्धत्वात्· नच विधिपुनश्श्रवणरूपस्याभ्यासस्यविधेययागादि
भेदकत्वं· दध्नीजुहोतीवद्विधेर्देवतारूपगुणसंक्रांतशक्तिकत्वेन यागविषयत्वाभावात्· नचया
गोत्पत्तिवाक्यस्थगुणावरोधान्नोत्पन्नवाक्येनगुणविधिः। अगत्याप्राथमिकवाक्यस्थसमित्पद
स्यतत्प्रख्यन्यायेननामधेयत्वांगीकारात्· वस्तुतस्तुयदियाज्यामंत्रवर्णात्समित्प्राप्तिस्तदासात
न्तापानदीनामप्यविशिष्टा। अतउपांशुपातानुवादेनविद्धाकाविहितकर्मानुवादेनवापंच
स्वपिदेवताविधिः। नचसंभवत्प्राप्तिकता· याज्यामंत्रवर्णवदनुमंत्रणमंत्रेभ्योपिविकल्पेनवसंता
दिदेवताप्राप्तिसंभवेनैतेषांनियमविधित्वोपपत्तेः। अतश्चानन्यपर पुनश्श्रवणाभावान्नकर्मभेद
इतिप्राप्तेउभयाकांक्षावल्लभ्ययाज्यामंत्राणामेवदेवताकल्पकत्वस्यपुरस्फूर्तिकत्वेनान्यतराकां
क्षावल्लभ्यानुमंत्रणमंत्रेभ्योदेवताकल्पनानुपपत्तेर्नसमिदादिपदानांदेवतानियामकत्वं· अत

श्चोपपदार्थस्यसंभवत्स्रामिकत्वात्पदश्कत्वादिनाविधेर्धात्वर्थभावनाविषयत्वप्रतीतेर्विहितविधाना
योगाद्विधेपतावच्छेदकातपावैजात्यसिद्धिः। नचैवंतत्प्ररव्यन्यायेनसमिदादिपदानांनामधेयत्वात्संज्ञ
यैवभेदसिद्धिः। तत्प्ररव्यन्यायेनगुणविधित्वनिराकरणेपिनामधेयकृत्यस्यैकेनैवैकस्मिन् कर्मणिसि
द्धेरनेकेषांनामधेयानांवैयर्थ्यप्रसंगेनसमिदादिपदानांगुणानुवादकत्वेनैवोपपत्तेर्नामत्वानिर्णयात्
सिद्धेतुअभ्यासेनकर्मभेदएकैककर्मणएकैकंनामधेयंसार्थकमितिनामत्वनिर्णयः। प्रयोजनमुत्तरा
धिकरणप्रयोजनं प्रयोजनांतराणिकौस्तुभेस्पष्टानि॥ ॥प्रकरणांतु॥ ॥तत्रत्यएवयएवंविद्वान्पौ
र्णमासींयजतेसयावदुक्थेनोपाप्नोतितावदुपाप्नोतियएवंविद्वानमावास्यांयजतेसपावदतिरात्रेणे
त्यादिवाक्येपिअभ्यासात्कर्मभेदः। नचायंलहूलेहत्वेपिवापच्छेदेनाविधिप्रतिवंधाद्विधिपुनरुक्त्यभावः।
समिधोयजतीतिवल्लेहत्वावगतेर्यच्छदस्पयोदीक्षितइतिवद्वेदनक्रियामात्रविधिप्रतिवंधकत्वात्

१२

अतएवपौर्णमास्यमावास्यापदमपिनामधेयंपौर्णमास्यांपौर्णमास्येतिवाक्यद्वयेनैतद्वाक्यविहि
तकर्मणोरेवकालविधानात्॰नचरूपाभावः।वार्त्रघ्नीपौर्णमास्यामनूच्येतेवृधन्वतीअमावास्याया
मितिवचनेनआज्यभागक्रमाम्नातानामपिऋचांक्रमंबाधित्वाएतद्वाक्यविहितकर्मांगत्वेनविधाना
न्मांत्रवर्णिकाग्निसोमदेवतायाःसर्वस्मैवाएतद्यज्ञायगृह्यतेयद्ध्रुवायामाज्यमितिवचनेनचद्रव्यस्य
प्राप्तत्वात्॰अथवाआग्नेयादिवाक्यैरेवपौर्णमास्यमावास्यादिपदोक्त्यापितैतद्वाक्यविहितकर्मानुवादे
नद्रव्यदेवताविधानाद्रूपलाभोपपत्तिः।नचानेकविधानाद्वाक्यभेदः।तद्धितेनदेवताविशिष्टद्रव्यवा
चिनापरस्परान्वयस्यव्युत्पन्नत्वेनविशिष्टविध्युपपत्तेः।प्रकारांतरेणरूपलाभस्तुकौस्तुभएवद्रष्टव्यः।
सर्वथाविद्वद्वाक्येकर्मांतरविधिः।एवंचदर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेतिफलवाक्येनप्रयाजादिसाधार
ण्येनसर्वेषामाग्नेयादीनांएतद्वाक्यविहितकर्मणोश्चप्रथमपक्षेफलसंबंधोद्वितीयेतुतत्साधारण्येनतयोरेव॰द

र्शपूर्णमासप्रातिपदिकस्यकालयोगिषुप्रसिद्धत्वेपिद्विवचनस्याप्रसिद्धत्वात् आज्यभागादिषुतस्यप्रसि
द्धत्वेपिप्रातिपदिकस्याप्रसिद्धेः। अतोराजसूयन्यायेननाम्नःसंकोचकत्वानुपपत्तेः प्रकरणात्सर्वेषामेव
यागानांफलसंबंधः। पाशाधिकरणन्यायेनद्विवचनस्याप्रसिद्धत्वेपिप्रातिपदिकमात्रप्रसिध्याकाल
योगिनामेववा अनयोरेववाद्वित्वस्यापिकथंचिदुपपत्तेः फलसंबंधः। नतुषण्णामेवाग्नेयादीनामितिप्रयो
जनमितिप्राप्तेलिंगक्रमाभ्यामाज्यभागांगत्वेनवार्त्रघ्नीवृधन्वतीमंत्राणांप्राप्तानामपेक्षितव्यवस्थाविधायक
त्वेनवार्त्रघ्नीवाक्यस्योपपत्तौनानपेक्षितगौरवापादकविद्धद्वाक्यविहितकर्मांगताबोधकत्वं· अतएवका
लद्वारेणकर्मद्वारेणवाव्यवस्थापरमेवतदितिवक्ष्यते· अतश्चननतावदनेनदेवताप्राप्तिः। नाप्याग्नेया
दिवाक्येन· प्राप्तकर्मानुवादेनानेकगुणविधानेवाक्यभेदात्· विधिफलस्यहिअज्ञातज्ञापनस्यैकविष
यत्वमेवसर्वत्रदृष्टंतस्यानेकविषयत्वेबाधप्रसंगः। नचविशिष्टविधानादवाक्यभेदः। विशिष्टस्याप्युत

न्नत्वात्· उक्तं त्ध्येतत्कारकतासंबंधेनपत्रतद्धितादिवृत्तिर्नतत्रपरस्परान्वयोपितुपत्राभ्याभिधानीमि
त्यादौतदतिक्तसंबंधेनवृत्तिस्तत्रैवसइति। अतश्चप्रकृतेदेवतालस्यसंप्रदानकारकत्वात्परस्परसं
बंधानुपपत्तेरुभयविशिष्टकर्मांतरविधानमेवावश्यकं· अतश्चरूपाभावस्तदवस्थएव· अस्तुवाकथं
चिद्रूपलाभस्तथापिनविद्वद्वाक्येकर्मविधिः। यच्छब्देनविधिशक्तिप्रतिबंधेनविधिपुनः श्रवणस्यैवाभा
वात्· नचतस्यवेदनक्रियामात्रविधिप्रतिबंधकत्वं· यच्छब्दादेस्तच्छब्दावधिकप्रतिबंधकत्वस्यैव
व्युत्पत्तिसिद्धत्वात्· किंच· अन्यपरत्वादपिनाभ्यासस्वरूपसिद्धिः। तथाहि· तत्तत्विद्वद्वाक्यस्थलउं
तयजिनाप्रकृतत्वादाग्नेयादयस्त्रयएवतत्तत्कालयोगिनस्तत्तन्नामधेयवशादनूद्यंते· तत्प्रयो
जनंचतत्रैणयजिनानेकोपादानात्समुदायद्वयसिद्धिः। तस्यापिप्रयोजनंफलवाक्येषण्णामेवफ
लसंबंधसिद्धिः। प्रातिपदिकस्यषट्स्तुकालयोगेनप्रसिद्धत्वात्· द्विवचनस्यचस्वराकाश्रयसमु

दायघटकसमुदायिद्वित्त्विसंबंधेन वक्तृत्वलक्षणार्थत्वात्. लक्षणातात्पर्यग्राहकमेव च शक्य
संबंधघटकसमुदायसिद्धिद्वारा विद्वद्वाक्यद्वयं. अन्यथा हि विद्वद्वाक्याभावे आग्नेयद्वयस्यैवैकवाक्यो
पादानावगतद्विविधयोगिनः कालद्वयप्रयुक्तस्य च फलसंबंधापत्तिः यथा च यदाग्नेयोष्टाकपाल इत्यत्राग्नेयद्व
यसिद्धिस्तथा कौस्तुभ एव प्रपंचितं. अतः षणां फलसंबंधसिद्धिरेवोक्तविधया विद्वद्वाक्यप्रयोजनमित्यन्यपर
त्वादपि न वैश्वदेवे न यजेतेतिवदभ्यासस्वरूपसिद्धिः। न चैवं पौर्णमास्यां पौर्णमास्येति वाक्यद्वयवैयर्थ्या
पत्तिः। तस्य समुदितयागत्रिकप्रयोगविधित्वेन सार्थकस्यैकादशे वक्ष्यमाणत्वात्. अन्यथा त्युत्पत्तिवा
क्येषु प्रत्येककालयोगात्प्रत्येकमेव दर्शौत्तरांगसहिते कैकप्रधानप्रयोगा भवेयुः। एवं चोत्पत्तिवाक्यैका
लश्रवणमपि द्विवाक्याधिकारवाक्यस्थयजिपदसंकोचार्थमेवेति समुदायसिध्यर्थं समुदायिनामनुवादकत्वा
वेवैतौ न कर्मांतरविधी इति सिद्धं॥ ॥पौर्णमासीवत्॥ ॥तंत्रैव जामिवा एतद्यज्ञस्य क्रियते पदन्वंचौ

पुरोडाशौउपांशुयाजमंतरायजति विष्णुरुपांशुयष्टव्योजामित्वाय प्रजापतिरुपांशुयष्टव्याजामित्वायाग्नीषो
माउपांशुयष्टव्यावजामित्वायेतिश्रूयते अंतरावाकेष्वेवंविदेवनकर्मांतरविधिः। अपितु तव्यप्रत्ययांत
वाक्यैर्विहितानांदेवतोपांशुत्वविशिष्टयागानां समुपापसिध्यर्थमनुवादएवफलत्प्रयोजनंचांतराल
कालविधिः। त्र्याणामेतेषांतावद्रूतामग्नीषोमावाज्यस्यैवनाउपांशुपौर्णमास्यांयजतिकाल
संबंधतात्पर्यग्रहद्वाराफलसंबंधसिद्धिर्वा· अन्यथाहि अग्नीषोमदेवत्यस्यैवकालसंबंधात्फ
लसंबंधस्यादितिप्राप्तेउपक्रमोपसंहारयोरेकविषयत्वेनैकवाक्यत्वप्रतीतेर्नतव्यप्रत्ययांतवाक्यैः

क

कर्मविधिः। अंतरावाक्यएवतुकालोपांशुत्वविशिष्टेकर्मविधिः। तदर्थवादश्चापंश्ववोत्तरभावेनसर्वो
पि· अन्यथावाक्यभेदापत्तेः। अतएवतव्यप्रत्ययांतैर्देवतामात्रविधिरंतरालवाक्यस्यकर्मणीत्यप्यपास्तं·नच
तत्रदेवतालाभः। शाखाभेदेनवैष्णवप्राजापत्याग्नीषोमीययाज्यानुवाक्यायुगलानामेतद्यागक्रमेसमाम्ना

तानांविकल्प्येन तत्तद्देवताकल्पकत्वोपपत्तेः। तस्यचतावद्ऋतामित्यनेनकालसंबंधात्फलसंबंधः। नवोत्पत्ति
शिष्टकालसंबंधानामेवाग्नेयादीनांरुचिसुपस्थितत्वेनफलसंबंधापत्तेरुत्पन्नशिष्टकालसंबंधस्योपांशुया
जस्यफलसंबंधानापत्तिः। अन्यथापुरोडाशांतरालकालसंबंधान्यथानुपपत्त्यैवपौर्णमास्यादिकाल
लभेनोपांशुयाजस्यफलसंबंधापत्तौतावद्ऋतेसस्यापितत्फलत्वानुपपत्तेरितिवाच्यंतावद्ऋतामित्येतदनं
तरमेवोपांशुयाजमंतरायजतीतिपठितमितिवार्त्तिकदर्शनादस्यापिकालस्योत्पत्तिवाक्येनैवविधेयत
याभिन्नवाक्यत्वाभावेनतुल्यबलत्वात्फलसंबंधोपपत्तेः। अतोनापंसमुदायानुवादइतिसिद्धंप्रयोज
नंस्पष्टं॥ ॥आधारा॥ ॥तन्त्रैवाघारमाघारपतातिश्रुते अग्निहोत्रंजुहोतीत्यत्रचपूर्ववद्वाक्यभेदस्यदूषक
त्वाभावाज्जुमाघारपतिमंतनमाघारपतिदध्नाजुहोतिपयसाजुहोतीत्यादिवाक्यविहितकर्मणांपर्यायो
गंसमुदायानुवादकत्वोपपत्तिः। दध्यादिवाक्यानांनिर्व्यापारेगुणमात्रेविध्यन्वयासंभवेनावश्यंगुणविशिष्ट

कर्मविधायकत्वात्. अतश्च रूपाभावाद्भेदकप्रमाणाभावाच्चाग्निहोत्रवाक्ये आधारवाक्ये वा न कर्मांतरं
अपितु तेषामेव समुदायसिध्यर्थमनुवादः। तत्प्रयोजनं च सर्वेषामेवाग्निहोत्रसंज्ञकत्वेन फलसंबं
धसिद्धिः। इतरथा अग्निदेवत्यहोमस्यैव तदापत्तिः। आघारवाक्ये समुदायानुवादप्रयोजनं तु कोक्तभेद
ष्टव्यं. नच दध्यादिहोमेषु देवताद्यभावः। समुदायानुवादबलेनैकप्रयोगविधिपरिग्रहावगतेः सकृद
नुष्ठानेनाग्न्यादिहोमांगभूतदेवतायाः प्रसंगेन दध्यादिहोमोपकारकत्वोपपत्तेरिति प्राप्ते सर्वत्र गुणमा
त्रविधाने न तृतीयविधिप्रकारोपपत्तौ पंचमविधिप्रकारांगीकरणस्यान्याय्यत्वान्न दध्यादिवाक्येषु विशि
ष्टकर्मविधानं. न च गुणे विध्यन्वयानुपपत्तिः। होमकर्मकगुणकरणकभावनायामेव विध्यन्वयेपि प्रा
प्ताप्राप्तविवेकेन विधिफलस्याज्ञातज्ञापनरूपस्य भावनायाः स्वरूपेण प्राप्ततया गुणमात्रविषयत्वोपपत्तेः।
अत एव सर्वत्र प्राप्तातिके विशिष्टभावनाविधानेपि फलमादाय षड्विधिप्रकारास्तेषां चोत्तरोत्तरस्य

दौर्बल्यं पूर्वमुक्तं। अतश्चप्रमाणसभावादेव समुदायानुवादत्वासंभवादाद्य विधि विधया कर्म विधी एवाघारा
ग्निहोत्रवाक्ये। नचरूपज्ञानाभावात्कर्मविध्यनुपपत्तिः। तस्यानुष्ठानंप्रति कारणत्वे पिशाव्दवोधं प्रत्यकारण
त्वात्. अतश्च विजातीयहोमत्वावच्छिन्नस्य विधाने वगते वाक्यांतरेण रूपलाभे पिन काचित्क्षतिः। प्रयो
जनंदध्यादिद्रव्यसमुच्चयविकल्पाभ्यां स्पष्टं॥ ॥द्रव्यसंयोगात्॥ ॥अग्नीषोमीयं पशुमालभेतेति श्रुतं तथा
सोमेनयजेतेति च. तत्राद्यविधिप्रकारस्यासंभवान्न पूर्ववत्कर्मविधित्वं. अपि तु समुदायानुवादत्वमेवाक
र्मप्राप्तिरुक्तपशोर्हृदयस्याग्रेवद्यति अथ जिह्वाया इत्यादिभिः। उत्पत्तिशिष्टपशुसाध्ये यागे हृदयादीनांसा
धनत्वानुपपत्तेर्नतदुद्देशेनावदानरूपसंस्कारविधिः। अतो विहितानां हृदयाद्यवदानानां पशुप्रभवद्रव्यत्व
वदानत्वसादृश्यात्सांनाय्यावदानप्रकृतिकत्वावगतेः सांनाय्यवदेव हृदयादीनां यागसाधनत्वस्य
प्रतीकवदनुमानाद्यागवद्धृदयादियागा एव विधीयंते. तांश्चलक्षणया आलभतिना अन्यद्याग्नीषोमीदे

वता विधीयते॰ पशुपदं चत्वदयादीनां छागप्रकृतिकत्वस्य मंत्रवर्णप्राप्तत्वाल्लक्षणयात्वदयादिपरं॰ अथ वा
त्वदयादिवाक्यविहितावदानाक्षिप्तस्पर्शात्तेवालभतिना शक्तोवान्यपशुशब्दलक्षितत्वदयादीनां प्रत्येकं
देवतासंबंधे कृते तावतो यागाद्देवतासंबंधकल्पितास्तेनैव विधिना विधीयंते॰ सर्वथा पशुपदं समुदाया
नुवादः। तथा सोमेपि ऐंद्रवायवं गृह्णाति मैत्रावरुणं गृह्णातीत्यादिवाक्यैर्द्रव्यदेवतासंबंधानुमितयागविधा
नं॰ ग्रहणे देवतान्वयानुपपत्तेः। द्रव्यं चाग्रव्याधारया गृह्णातीति प्रकृतं धारासमर्थद्रवं तद्धितोपात्तं सोम
वाक्ये नु तत्प्रकृतित्वेन सोमलताविधिर्व्रीहिविधिवत् सोमं अभिषुणोतीत्यादिसंस्कारविध्यन्यथानुपपत्ते
र्वा अध्वर्युं वृणीत इतिवत्सोमप्राप्तेः सोमपदं नामधेयं। सर्वथा यजिः समुदायानुवादः। तत्प्रयोजनं
चास्मिन्पक्षे सोमद्रव्यकयागमात्रानुवादादस्तुतशस्त्राणामपि फलसंबंधः। ज्योतिष्टोमपदं चवेभ्यदे
ववक्रोणं। समुदायानुवादाभावे हि तद्वशात्स्तुतशस्त्राणामेव यागानां फलसंबंधापत्तिः। तेषामेवज्यो

तीरूपस्तोमसंबंधात्। सिद्धांते तु धागस्यैकत्वात्फलवाक्यस्य यजिनाऽभ्यासलक्षणापत्तेर्विजातीय
यागत्वावच्छिन्नस्यैव फलसंबंधः ज्योतिष्टोमपदे वरुन्नीत्यर्थस्तु स्वसंबंध्यभ्यासघटितसमुदायाश्र
यरूपः। अतः समुदायानुवादावेताविति प्राप्ते पशुपदे ह्दयादिलक्षणयां प्रमाणाभावात्तत्रैव वि
शिष्टयागविधिः। ह्दयादिवाक्येष्वह्दयाद्युद्देशेन संस्कारमात्रं। पशोश्च न साक्षाद्धविष्ट्वेन विधा
नं। किंतु विशसनावदानादिविधिरूपतात्पर्यग्राहकानुरोधेन ह्दयादिप्रकृतित्वेनैव। करण
त्वस्य साक्षादिव परंपरयापि तात्पर्यग्राहकेसत्तुपपत्तेः। अत एवातिदेशप्राप्तावदानसं
बंधो पि ह्दयादीनां हविष्ट्वसिद्ध्यर्थस्तदितरांगानां हविष्ट्वपरिसंख्यार्थश्चेत्यादिकौस्तुभे द्रष्ट
व्यं। सोमेपि नैंद्रवायवादिवाक्यैर्यागविधिर्गौरवात्। किंतु देवताविशिष्टग्रहणस्यैव तद्धितो
पात्तव्योद्देशेन विधिः। संभवति च देवतात्वस्य निरूपकतासंबंधेन ग्रहणे वैशिष्ट्यायोगो नियह

णं कालीनोच्चारण कर्माभूत वृत्तित्वसंबंधेन ग्रहणे वैशिष्ट्यं। अतश्च देवताया ग्रहणांगभूता
या अपिया पेक्षा यां सोमे वाक्य विहित यागस्यैव देवता पेक्षस्योपपादकत्वमात्र कल्पना द्धाघ
वं। सोमपदं तु संस्कार विध्यन्यथानुपपत्त्या संभवत्प्रामिकत्वे पि सत्कुर्व्याद्वृत्ति फलक सोम निष्प
न्नार्थे न विरुध्यते। यथा वैधं सति ग्रहणानां समुच्चयो यागस्य च प्रति ग्रंहणमावृत्तिस्तथा सर्वं
को स्तु भ एव निरूपितं। प्रयोजनं पशु विकारे न्द्र याद्दियागाद्यन्यतम प्रकृतित्वान्नैकादशाव
दानगणप्राप्तिः पूर्वपक्षे· सिद्धांते तु सेति द्रष्टव्यं। सोमे चाव्यक्तत्वसिद्धिरेव॥ पृथक्त्व निवेशा
त्॥ आनममस्य देवा इति तिस्र आकूता ऽर्जुति आज्यभागौ यजती त्यादौ एकत्वातिरिक्त संख्यायाः
स्वाश्रय प्रतियोगिक स्वाश्रयवृत्ति भेदव्याप्यत्वेन नतावत्साक्षाज्ञावनाभेद वोधकत्वं· तस्याउ
क्त संख्याश्रयत्वाप्रतीतेः। नापि धात्वर्थ भेदवोधकत्वं। तस्य पूर्व प्रमिते कत्व संख्यावरुद्धत्वेनैका

भा० १८

दशप्रयाजान्यजतिविराट्संपन्नमग्निहोत्रंजुहोतीत्यादिवत्संख्यांतरसंबंधानुपपत्तेरेतत्संख्याया
अभ्यासविषयत्वप्रतीतेरकर्मांतरत्वमितिप्राप्तेनात्रसंख्यांतरावरोधः।साहिनतावत्तिङुपा
त्ता।तस्याःकर्तृवृत्तित्वात्।नचानवच्छिन्नस्यान्वयानुपपत्तेःप्रथमातिक्रमेवकारणाभावात्त्वर्थेएक
त्वसंख्यानुमानमितिवाच्यंश्रुतसंख्यासत्वेकारणाभावस्यासिद्धत्वेनानुमानाप्रसरात्।अतए
वप्रयाजैकादशत्वस्थलेयत्रप्रकृतौअनुमानप्रसरस्तत्राभ्या।विषयत्वं।नचैवंविराट्संपत्तिवाक्या
दावपिउत्पत्तिवाक्येएकत्वानुमानापत्तिः।तादृशस्थलेस्वोपजीव्योत्पत्तिवाक्यजन्यशाब्दबोधनिर्वा
हार्थंप्रवृत्तस्यानुमानस्योत्तरकालिकेनसंख्याश्रवणेनबाधायोगात्तस्याभ्यासविषयत्वप्रतीतेः।
प्रकृतेतुशाब्दबोधात्पूर्वमेवेतरपदार्थवत्संख्यायाअपिप्रतीतेर्युक्तःशाब्दबोधोत्तरकालीनानुमानप्र
तिबंधइतिकौस्तुभेविस्तरः।अतश्चसिद्धमुत्पत्तिवाक्यगतकर्मसमानाधिकरणविधेयसंख्यायाःकर्मभेद

१८

कत्वं। भावनाभेदस्तु शब्दांतरादेव। प्रयोजनं वेदिप्रोक्षणमंत्रवत्सर्वपक्षे सकलमंत्रः सिद्धांतेतु तदाहृक्ति
रिति॥ भाष्यकारेणातु सप्तदश प्राजापत्यान्पशूनालभेतेति वाक्ये यागभेदाभेदचिंता कृता। तत्र यद्यपि देव
तात्वविशिष्टद्रव्यविशेषवाची तद्धितो यद्यपि च प्राजापत्यपद एवैकशेषस्तथापि तदुत्तरविभक्त्युपात्ता
याः संख्यायाः प्रकृत्यर्थविशेष्य एवान्वयः न तु विशिष्टे। द्वौ त्रय इत्यादौ तथैव व्युत्पत्तेरिति तावदविवादं।
सोपि च न द्रव्ये देवतात्वान्वयोत्तरं। तथासति देवतात्वप्रतिसंबंधिनि द्रव्ये साहित्यानवगमेन प्रत्येकं हि
पशुत्वावच्छिन्न एव तत्संबंधप्रतीतेरनेकत्वावगमात्संबंधभेदेनानेकयागादिकल्पनागौरवापत्तेः। अतो ला
घवाद्देवतात्वान्वयात्पूर्वमेव संख्यान्वयः। तदा हि पशुत्वावच्छिन्न एवैकदेवतासंबंधादेकयागादिकल्प
नाल्लाघवं। नवप्रकृतिप्राप्तैकपशुनिष्पन्नैकादशावदानगणैकत्वानुरोधेन संख्याया देवतात्वान्
योत्तरमन्वयः। पशुगतैकत्वस्य श्रुतसप्तदशत्वेन बाधात्। अवदानगणैकत्वस्य च प्रकृतावार्थिकत्वे

नेहानतिदेशात्। अतोदेवतासंबंधभेदेप्रमाणाभावान्नयागभेदः। अस्तुवासमानाभिधानश्रुत्याव
ऋत्वान्वयात्प्राग्देवतात्वान्वयेनसंबंधभेदस्तथापिलाघवाद्यागैकत्वं। यथैवहिसिद्धांतेऽनेकेयागाः
सकृदनुष्ठानेनोपपाद्यंतेतथामन्मतेपेकेनयागेनानेकेदेवतासंबंधाइतिप्राप्तेसमानाभिधानश्रुत्या
देवतात्वस्यांतरंगत्वात्संख्यान्वयात्पूर्वान्वयित्वं। पश्चनांप्रत्येकंस्वत्वाश्रयत्वेनस्वत्वध्वंसानुकूलव्यापारात्म
कयागकरणत्वरूपहविष्ट्वस्यप्रत्येकवृत्तितयास्वत्वहविषोरित्यादिस्मृत्यनुसारेणहविष्ट्वावच्छेदकपशु
त्वावच्छेदेनैवदेवतासंबंधोवित्याच्च। अतश्चपशुत्वानवच्छिन्नस्यैवप्रतिसंबंधित्वात्प्रतिसंबंधितावच्छे
दकस्यप्रत्येकवृत्तित्वेनप्रतिसंबंधिभेदप्रतीतेस्तद्भेदेनसंबंधभेदासिद्धिः। नचसंबंधभेदेपियागै
कत्वं। संबंधानामेकत्वानेकत्वाभ्यामुभयथाप्युपपत्तौलाघवापेक्षयापश्वैकताप्रापिवोदकस्यशा
स्त्रतयाबलवत्त्वेननियामकत्वात्। अतस्तदनुरोधेनैवसर्वत्रयागभेदोभावनाभेदश्चेतिसिद्धं। प्रयो

ज्ञेनेयागैकत्वे एकपशुविस्मरणेपितस्यज्ञातत्वान्नपुनर्यागकरणं सिद्धांतेतुतदिति॥संज्ञाच॥ज्योति
ष्टोमं प्रकृत्याथैषज्योतिरथैषविश्वज्योतिरथैषसर्वज्योतिरेतेनसहस्रदक्षिणेनयजेतेति श्रुतेषुज्योतिरादिपदा
नांगुणविशेषप्रसिद्ध्यभावात् द्योतनात्मकत्वेनप्रसिद्ध्युपादानेकर्मण्यपितदापत्तेरेतच्छब्दे नचतद्विधाने
वाक्यभेदापत्तेस्तेषांनामत्वंतावदविवादं।तच्च नप्रकृतस्ययागस्य ज्योतिष्टोमसंज्ञावरोधात्। संज्ञाकार्य
स्यव्यवहारस्यैकेनैवसिद्धेरितरवैयर्थ्याच्च।नचविनिगमकाभावाद्विकल्पः।अथशब्दस्यपूर्वकर्माधि
कारविच्छेदकस्यनिपातकत्वात्।अतएववसंतेवसंते ज्योतिषेतिवन्नाख्याविकारत्वाशंका।तस्यविच्छि
न्नेऽधिकारेसमाम्नानेनतथांगीकारात्।नचैवमधिकारविच्छेदाभावेउद्भिदादिसंज्ञातोभेदानापत्तिः।ज्यो
तिष्टोमसंज्ञायाउत्पत्तिशिष्टत्वाभावेनद्वयोरपिविकल्पोवैपरीत्यंवाकिंनस्यादितिवाच्यं।सोप्रयागेष्वप्रवृ
त्तिनिमित्तकज्योतिष्टोमसंज्ञावसेद्धेउद्भित्संज्ञायाः कथमपिनिवेशानुपपत्तेस्तस्याभेदकत्वात्।अ

तएवयत्रनकिंचिन्नियामकमस्तितत्रसंकल्पादौसंज्ञयोर्विकल्पएव। प्रकृतेतुअथशब्देनविच्छेदाद्भेदकत्व
मेवसंज्ञायाः। सहस्रदक्षिणेनयजेतेत्येतावतैवप्रकृतयागानुवादेनगुणविध्युपपत्तौ एतच्छब्दात्तस्यज्योति
रादिवाक्यस्यवैयर्थ्यप्रसंगाच्च। अतोद्योतनादियोगेनज्योतिरादिसंज्ञंकर्मत्रयंसोमयागप्रकृतिकंतत्त
द्वाक्येषूत्पन्नंसहस्रदक्षिणाकं। एतेनअद्भिकामोयजेतेतिवाक्येनफलेविधीयतइतिसिद्धः संज्ञयाक
र्म्मभेदः॥ गुणाश्च॥ ॥वैश्वदेव्यामिक्षेत्यत्रद्रव्यदेवताविशिष्टेयागेविहितेतदनुवादेनवाजिभ्योवाजि
भ्योवाजिनमित्यत्रनगुणमात्रविधिः। प्राप्तकर्मानुवादेनानेकगुणविधानेवाक्यभेदापत्तेः। नचवाज
मन्नमामिक्षारूपंविद्यतेयेषामितिव्युत्पत्त्याविश्वदेवानतद्विशिष्टयागंवोद्दिश्यवाजिनमात्रस्यविकल्पे
नसमुच्चयेनवाविधिरस्त्विति वाच्यं· वाजिशब्दस्यरूढत्वेनविश्वदेवानुवादानुपपत्तेः। उत्पत्तिशिष्टद्र
व्यावरोधेद्रव्यांतरस्यनिवेशानुपपत्तेश्च· एतेनामिक्षानुनिष्पन्नवाजिनसंबंधप्राप्त्यावाजिनपदंआमि

क्षायागनामधेयमंगीकृत्यतदुद्देशेनवाजिदेवताविधिरित्यप्युपात्तं॰ उत्पत्तिशिष्टदेवतावरोधेदेवतांतरस्य
निवेशानुपपत्तेः। किंचामिक्षायाःपार्ष्टिकोदेवतासंबंधः पदश्रुत्यावाजिनस्यतुवाकोनेतिदौर्बल्यं॰ तद्धितस्यहि
देवतात्वविशिष्टेद्रव्यविशेषेशक्तिः आमिक्षापदंचतात्पर्यग्राहकमितिप्रांचः। आमिक्षादौद्रव्येदेवतात्वेचभिन्ना
शक्तिर्निरूपकत्वंतुसंसर्गोदेवतात्वएववाशक्तिर्द्रव्येलक्षणाद्द्रव्यविशेषएववाशक्तिर्देवतात्वेलक्षणाद्द्रव्यसा
मान्यएववाशक्तिरामिक्षापदेनतुविशेषनिर्णयइत्येतेपक्षास्तत्कौस्तुभएवोपपादिताः। सर्वथाआमिक्षाद्र
व्यस्यदेवतासंबंधः पदश्रुत्येतिसिद्धं॰ किंचविश्वेषांदेवानांतद्धितेनदेवतात्वंशास्त्रोक्तं॰ अनुशासनसत्वात्॰ वा
जिनांतुसंप्रदानत्ववरचिन्याचतुर्थ्यासांप्रकलक्षणया॰ त्यज्यमानद्रव्योद्देश्यत्वविशिष्टप्रतिग्रहीतृत्वरू
पसंप्रदानत्वैकदेशत्वाद्देवतात्वस्य॰ तस्याःप्रतिग्रहीतृत्वाभावात्॰ निरुक्तधर्मसमनियतसंप्रदानत्वव्याप
कदेवतात्वरूपाखंडोपाधिस्वीकारेतुसुतरांलक्षणा॰ अतोपिदुर्बलत्वं॰ तस्माद्वाजिनवाकेपिगुणा

त्तद्रव्यदेवताविशिष्टंकर्मांतरमेववाजिनप्रतिपत्त्यर्थमामिक्षापागांगत्वेनविधीयते।गुणस्यचसर्वत्रानि
विशमानत्वेनभेदकता।साचक्कचिद्वाक्यभेदापत्त्याक्कचित्प्रबलगुणावरोधात्क्कचिदेकप्रसरताभंगादि
नेत्यनेकप्रकारिकेतिध्येयं॥ ॥अगुणेतु॥ ॥यत्रतुनोत्पत्तौगुणश्रवणंयथाग्निहोत्रंजुहोतीति·तत्रत
दनुवादेनदध्नाजुहोतिपयसाजुहोतीत्यादिभिसर्वैरेवगुणविधानंविकल्पेन·तत्रखलेकपोतन्यायेनस
र्वेषामेवयुगपत्प्रवृत्तेरेकावरुद्धत्वाभावादितिप्रत्युदाहरणमात्रं॥ ॥फलश्रुतेः॥ ॥अग्निहोत्रंप्र
कृत्यदध्नेंद्रियकामस्यजुहुयादितिश्रुतेसएवहोमोदधिविशिष्टःफलोद्देशेनविधीयते·नचप्राप्तक
र्मानुवादेनगुणसंबंधःफलसंबंधश्चेतिवाक्यभेदः।प्राप्तानामपिकर्मणांराजकर्तृविशिष्टानांफलो
द्देशेनराजस्वपवाक्येविधानवदिहापितदुपपत्तेरितिप्रथमःपक्षः।द्वितीयस्तुनात्रराजसूयन्या
यः।कर्तुर्हिप्रयोगान्वयित्वात्फलस्यचविनियोगान्वयित्वादुत्पन्नस्यापिकर्मणःप्रयोगविधौफलवि

शिष्टविनियोगस्य कर्तुश्चवैशिष्ट्योपपत्तिः। प्रकृते तु दर्भेऽस्यान्यस्यार्पितत्वेन प्राप्तेऽस्यानुवादेन गुणवि
धिः फलविशिष्टविनियोगविधिश्चेति वैशिष्ट्याभावाद्वाक्यभेदः अतो गुणात्कर्मभेदः। दधिविशिष्टंचत
त्फलोद्देशेन विधीयते। न दधिमात्रं भावार्थाधिकरणविरोधापत्तेः मत्वपि दर्विहोमत्वेद धिद्रव्यकहो
मत्वसादृश्याच्चाग्निहोत्रहोमातिदेशेनरूपलाभः। सिद्धांतुस्तु यत्र द्वयोरपि धात्वर्थगुणयोरप्रा
प्तिः संभवत्प्राप्तिः प्राप्तिरेव बाधात्वर्थस्यैव वा अप्राप्तिर्यथा सोमेन यजेत उरु प्रथा उरु प्रथा उरु प्रथस्वे
ति पुरोडाशं प्रथयति ऐंद्रवायवाग्रान् ग्रहान् गृह्णीयाद्यः कामयेत यथापूर्वं प्रजाः कल्पेरन्नित्य
ग्निहोत्रं जुहोतीत्यादौ तत्र भावार्थाधिकरणन्यायः। यत्र तु गुणस्यैवाप्राप्तत्वाद्विधेयत्वं तत्र
तस्यैव फलसंबंधः। न च दध्नोऽपि नियताप्राप्तिरपि तु विकल्पेन अतः पाक्षिकानुवादत्वपरिहाराय तस्यै
व विधेयत्वात्फलसंबधः। कारणीभूतगुणसत्वेन वचनं विनापि फलोत्पत्तिसंभवाद्वचनवैयर्थ्यप्रसंगे

नस्वकृतिसाध्यधात्वर्थस्यदृष्टविधया गुणसंबंधिन आश्रयस्यापेक्षायां प्रकरणाद्धोमस्याश्रयत्वलाभाज्जुहो
तिःसाधुत्वार्थमनुवादः दधिकरणकंभावनांतरमेवतु फलोद्देशेन विधीयते। प्राप्तभावनानुवादेनोभयक
रणेवाक्यभेदात्। केचित्तुकरणत्वविशिष्टं दधिः दधिकरणत्वंवात्तीयार्थं फलकरणत्वेन विधीयते। तृ
तीयार्थकरणत्वस्यनिरूपकापेक्षैवचाश्रयापेक्षेत्याहुः। तन्नः यागवैषम्ये प्रमाणाभावात्। सर्वथा
सिद्धोगुणफलसंबंधः प्रयोजनंदध्नोनप्रतिनिधिरुक्तेषविशेषोवासिद्धांते द्रष्टव्यं॥ ॥समेषु
॥ ॥त्रिवृदग्निष्टुदग्निष्टोमइत्यनेनविहितस्याग्निष्टुद्यागस्यफलसंबंधे तस्यवाययास्वेकवि
शमग्निष्टोमसामकृत्वाब्रह्मवर्चसकामोस्येतेनयजेतेत्यनेनकृते पश्चादाम्नातं। एतस्यैवरेव
तीषुवारवंतीयमग्निष्टोमसामकृत्वापशुकामोस्येतेन यजेतेति। तत्रापि एवंवदाघः पूर्वपक्षः।
राजसूयन्यायेनस्वकारकविशिष्टाग्निष्टोमस्तोत्रभावनाविशिष्टक्ताप्रत्ययार्थभूतकालकर्त्री

दिरूपप्रयोगान्वयिगुणसत्वेन विनियोगविशिष्टप्रयोगविधिसंभवात्॥इष्यते चायमेव प्र
कारो वापर्व्यवाक्ये सिद्धांतिनापि॰द्वितीयस्तु नात्र राजसूयन्यायः।प्रयोगस्य अग्निष्टोत्रस्तोत्रो
त्तरकालत्वस्य च वायव्यवाक्येनैव प्राप्तत्वात् तदनु वादेन रेवतीविधिः फलोद्देशेन अग्निष्टुत्वि
नियोगविधिश्चेति वाक्यभेदात्॰ वायव्यवाक्ये हि अग्न्याति देशेन संभवत्प्राप्तिकमग्निष्टोमस्तोत्रोत्तरकाल
तादित ततः पूर्वप्रवृत्तांगीकारेण प्रयोगविशेषणतया विहितं॰ न त्वत्र वायव्यवाक्यस्यापि तत्पूर्व
नास्य पूर्वप्रवृत्तांगीकारानुपपत्तेः।नच विनिगमनाविरहः।प्राथम्यस्यैव नियामकत्वात्॥अत्र
तोऽलाघवाज्जुषा एव रेवत्यधिकरणक वारवंतीयाख्यो रेवत्याख्या एव वा अप्राप्तत्वात् फलोद्देशेन
विधीयते॰ वारवंतीयमग्निष्टोमसाम कार्यमिति प्राकरणिकवाक्येन वारवंतीयस्यापि प्राप्तत्वात्॰
नचास्मिन् पक्षे तृतीयांते नैतच्छब्देन विलिंगसंख्यत्वाद्रेवतीमात्रनिर्देशानुपपत्तिः।तेन रेवतीविशि

ष्टवारवंतीयनिर्देशेपि दाक्षापपायज्ञंन्यायेनाश्रामरेवतीमात्रस्यैव फलसंबंधोपपत्तेः। अतो हृधिन्या
येननुपफलसंबंध एव युक्तः। सिद्धांतस्तु नात्राश्रयलाभः शक्यते वक्तुं। यागस्य तावत्प्रकृतत्वेपि अग्निष्टोम
मामेत्यनुवादानुपपत्तेर्न साक्षादाश्रयत्वं। अग्निष्टोमस्तोत्रद्वारा तस्यैव वा सार्श्वदाश्रयत्वं तु अग्निष्टोम
स्तोत्रस्यातिदेशतस्तोत्रांतरसाधारण्येनोपस्थितत्वादनाशंक्यं। न च बाधयव्यावाकोन तस्यौपदेशिकी
विशिष्योपस्थितिः। आतिदेशिकस्य तु बाधसंभवेऽप्यौपदेशिकतद्बाधस्यान्याय्यत्वेन विशिष्योपस्थि
तेराश्रयत्वासाधकत्वात्। न च साम्नो योगापत्ति धातुवाच्यत्वेन क्रियारूपत्वादाश्रयालाभेपि मस्त्विति। सा
म्नो ध्वन्यात्मकस्वरमाहाररूपत्वेन वाक्यशेषादौ प्रसिद्धस्य सिद्धरूपतया धातुवाच्यत्वस्याप्रयोजकत्वा
त्। अन्यथा सोभरस्यापि स्तोत्राश्रयत्वानुपपत्तेः। वारवंतीयसाम्न आश्रयानपेक्षणे अग्निष्टोमसा
मेत्याद्यनुवादानुपपत्तेश्च। अतः साम्न आश्रयसापेक्षत्वात् तान्नतावत्प्रकरणेनाश्रयलाभः। न च

वारवंतीयमग्निष्टोमसाम कार्यमिति प्राकरणिकेन वाक्येनैव गौरवभियाऽङ्गत्वाविधानादाश्रयसम
र्पणमिति वाच्यं॰ साम्नो गुणत्वपक्षे तल्लाभोपपत्तावपि रेवतीमात्रस्य गुणत्वे तदयोगात्॰ साम्नो गुणत्वं तु विधे
रप्राप्ते रेवतीमात्रसंक्रमादेवासंभवि॰ फलपदाभावे हि विधिर्यद्विषये अप्राप्ततया व्याप्रियते तस्यैव प्रयोज
नाकाङ्क्षया फलसंबंधो गोदोहनादेः। तदत्र पशुपदाभावे वारवंतीयस्य प्राकरणिकवाक्येनैव प्राप्तत्वाद्वि
धिरप्राप्ते रेवतीमात्रविषयः संपद्यत इति तस्यैव फलसंबंधो वाच्यः। न चास्याश्रयः केनापि प्रकारेण
लब्धुं शक्यः। न च प्रकारांतरेणालाभेऽप्यनेनैव वाक्येनाश्रयविशिष्टगुणविधानादाश्रयगुणोभयवि
शिष्टभावनाविधानाद्वा तल्लाभोपपत्तिः एकप्रसरप्रयोजनत्वाल्लाघवेनाश्रयतासंबंधेनैव वैशिष्ट्यां
गीकाराच्च न गुणांगतापत्तिरिति वाच्यं॰ आश्रयस्य गुणान्वयाव्युत्पत्तेः। कर्मत्वातिरिक्तस्याश्रयत्वस्य
दुर्वचत्वेन भावनायाः फलाश्रयरूपोभयकर्मकत्वांगीकारे एककर्मकत्वभंगापत्तेश्च॰ न च कृत्वा

भा० २४

२४

शब्दोक्तायामाश्रयस्याग्निष्टोमस्तोत्रस्य कर्मत्वात्तदुत्तरकालताविशिष्टगुणभावनाया आख्या
तोपात्तायाः पशुकर्मकत्वान्नैकस्या भावनाया द्विकर्मकतापत्तिरिति वाच्यं गुणभावनाया अवच्छे
दकीभूतधात्वर्थापेक्षायां यागस्यावच्छेदकत्वांगीकारे रेवतीनां यागकरणत्वापत्त्या स्तोत्रं प्रतिकरण
त्वानापत्तेः। स्तोत्रस्यैवावच्छेदकत्वांगीकारे तु धात्वर्थद्वयावच्छिन्नभावनाद्वयाभावात्काप्यनुपपत्तिः।
न च रेवतीविशिष्टाग्निष्टोमस्तोत्रभावनोत्तरकालविशिष्टरेवतीकरणकयागाप्रापिकभावनैव फलोद्देशेन विधी
यतामिति वाच्यं आख्यातोपात्तभावनाया द्विकर्मत्वापत्तेस्तदवस्थत्वात् न च प्रकरणाद्यागस्याश्रयत्वोपपत्ते
र्न द्विकर्मकत्वं। तथात्वेपि स्तोत्रांशे तच्छब्दस्य धातुपारार्थ्यभयेन यागपरामर्शित्वस्यैवापत्तौ रेवत्यादिपरा
मर्शकत्व एव प्रमाणाभावात् अतस्तदपेक्ष्यालघुभूतकर्मांतरविधानमेव न्यायः। तदाहि निकायित्वेने
तस्याग्निष्टुद्यागविकारत्वाद्रैवतीयं साममेव केवलं रेवतीविशिष्टस्तोत्रभावनोत्तरकालताविशिष्ट

२४

याग़ांतरभावनेनैव फलोद्देशेन विधीयते । षष्ठ्यंते तच्छब्दः प्रकृतिविकारभावानुवादकः । तृतीयांते तच्छब्दः प्र
स्तोष्यमाणकर्मवचनो न दुष्यति । उत्तरकाललक्षणयोगुणस्य प्रयोगान्वयित्वाद् वेष्टिवृष्यघपितद्भेदमेवापादये
त्तथापि कालस्यात्र संभवत्वाधिकात् तया वाक्यभेदपरिहारार्थं विधेयत्वेपि तात्पर्यगत्यायागे परंपरासंबं
धेन विधेन विधेयस्य रेवत्याख्यास्य गुणस्योन्मत्यन्वयित्वात्कर्मभेदबोधकत्वाविघातः ॥ ॥सौभरे॥ ॥ब्रह्मसामाख्य
स्तोत्रे प्रकृत्य समाम्नाते यो वृष्टिकामो योन्नाद्यकामो यः स्वर्गकामः स सौभरेण स्तुवीतेत्यत्रैतैर्वाक्यैरुक्तस्तोत्राश्रि
तं सौभरं साम फलत्रयोद्देशेन विधीयते । उद्देश्यानेकत्वेन स्तुवीतेत्यस्यानुषंगेण वाक्यभेदप्रतीतेः । सौभरे च शाखा
भेदेन निधनाख्यांतिमसामावयवाधारतया हीषूऊऊर्क् इत्यादीन्यक्षराण्याम्नातानि । तदेवं सौभरं प्रकृत्य हीषिति
वृष्टिकामाय निधनं कुर्यात् । ऊ इति स्वर्गकामाय ऊ इत्यन्नाद्यकामायेति श्रुतं तत्र वृष्टिकामादिशब्दानां फल
परत्वात्तदुद्देशेनैव हीषादयो गुणा विधीयंते । सौभरं च प्रकृतत्वाद्धृयादिवदाश्रयः । निधनाधारतया हीषा
दिपाठस्यैव नियामकत्वाद्भागांतरे स्तोभाद्यक्षरांतराबाधापत्तेश्च न निधनातिरिक्तभागस्याश्रयत्वापत्तिः ।
न च लाघवात् वृष्टिसाधनसौभरीयनिधने च नियमेन प्राप्तानां हीषादीनां नियमात्रकरणाव्यवस्थार्थ

त्वं शंक्यं तथात्वे वृष्टिकामादिपदैः नन्त साधनीभूतसोभरलक्षणापत्तेः। तस्य च निधनविशेषणत्वे विशि
ष्टोद्देशापत्तेश्च। अतः सोभरफलात्फलांतरार्थो निहीषादीनीति प्राप्ते नियमविधिलाघवानुरोधाद् वृष्टि
कामादिपदैर्वृष्टिसाधनसोभरलक्षणामंगीकृत्यापि हीषादिनियमविधिरेवाश्रीयते। पक्षत्रामिश्च पाठ
न्निधनस्यानएवेति नियमस्यापि तत्स्यानकत्वलाभः। वस्तुतस्तु नियमविधिलाघवानुरोधेन हीषादेर्वृ
ष्ट्याद्यर्थैर्नैव स्वसाधनसोभराधारत्वसंबंधेनाश्रीयत इति न लक्षणापि। संबंधघटकीभूतं च सोभरं न
सोभरत्वावच्छिन्नं। अपि तु सोभरविशेष एव। शाखाभेदेन हि कश्चिद्विजातीयानि सोभराणि निधनांत
रयुक्तानि सामाम्नातानि। तत्र च हीषः पक्षेऽप्राप्तत्वान्न तस्य सोभरस्य संबंधघटकत्वं। अपि तु
यज्जातीयसोभरे हीषादीन्यनियमेन समाम्नातानि तज्जातीयस्यैव तत्। अतश्च वृष्ट्यर्थं नि
रूढसंबंधेन हीषेवेति नियमकारणात्संबंधघटकीभूतसोभरे निधनांतरव्यावृत्तिवद्विजाती

यसोभरांतरस्यापिवृद्ध्याद्यर्थत्वव्यावृत्तिसिद्धिः। अतश्चतन्नित्यप्रयोगविषयमेवसंपद्यत इतिविवेकः॥ ॥इतिश्रीखंडदेवकृतौभाट्टदीपिकायांद्वितीयस्यद्वितीयःपादः॥ ॥शुभमस्तु॥ ॥ज्योतिष्टोमेयदिरथंतरसामासोमःस्यादैंद्रवायवाग्रान्ग्रहान्गृह्णीयाद्यदिबृहत्सामाशुक्राग्रानितिश्रुतेतत्रपदिशब्दोपात्तस्यनिमित्तत्वस्यनतावद्रथंतरेबृहतिवान्वयः। तस्यविशेषणत्वेनबृहत्यनर्हत्वात्. नाप्यन्यपदार्थेतस्यकादाचित्कत्वाभावात्. नापिविशिष्टे. ज्योतिष्टोमेसामांतराणामपिनियतत्वेनबृहद्रथंतरयोरन्ययोगव्यावृत्त्याविशेषणत्वासंभवात्. ज्योतिष्टोमत्वावच्छेदेनायोगस्यापिव्यावर्त्तयितुमशक्यत्वाच्च. अतःसमासार्थस्यकेवलरथंतरसामकत्वस्यप्रकृतेकर्मणिग्रहाग्रतानिमित्तत्वेनन्निवेशायोगादुभयविशिष्टंकर्मांतरमेवविधीयते. यदिशब्दस्त्वविवक्षितार्थइतिप्राप्तेबृहद्रथंतरयोर्ज्योतिष्टोमेपाक्षिकत्वात्त्वायोगव्यावृत्त्यापरस्यरयोगव्या

द्वस्यावातिशेषणात्वोपपत्तिः। नच ज्योतिष्टोमत्वावच्छेदेन तदभावः। स्वावांतरकार्यएषस्तोत्रत्वावच्छेदे
न तदुपपत्तेः। अन्यथा तवापि साक्षाद्यागे प्रोक्षणावघातादीनदसंभवावश्यंभावात्‌· अतो युक्तैव रथंत
रविशिष्टस्य क्रतोर्निमित्तता· वस्तुतस्तु न क्रतोर्निमित्तत्वं तद्भावः प्रयोजनाभावात्‌· प्रकरणावगतक्र
त्वंगत्ववलेनान्यपदार्थसंबंधस्यानुवादत्वात्‌· अन्यथा ज्योतिष्टोमरूपान्यपदार्थस्य विरुत्वावभावे
नेष्टुकाम्यतादेरनापत्तेः। अतो लक्षणापि रथंतरमेव निमित्तं· नैमित्तिकं तु अग्नताविशेषः प्रकृताप्
र्वसाधनीभूतस्य होद्देशेन विधीयते। नच पाणादेवैद्वं वायवाग्नत्वनियमस्य प्राप्तेस्तद्विधिवैयर्थ्यं।
ततः पूर्वमेव नैमित्तिकतया विधानात्‌· तत्प्रयोजनं च निमित्ताभावे प्रकृतौ विकृतौ च लोपः। यद्यपि च स
र्वत्र निमित्तस्यसत्वे नैमिकावश्यकत्वमात्रं प्रमेयं तथापि नास्यात्र पाणादेवसिद्धेस्तदभावे तदभाव एव प्रमे
यं क्रोध्यः। तस्मान्न कर्मांतरविधिः॥ ॥अवेष्टौ॥ ॥राजसूये राजकर्तृके प्रत्येकदक्षिणाम्नानादवेष्टिसंज्ञ

काः पंचेष्टयः पृथक्प्रयोगाः समाम्नाताः। तदवांतरप्रकरणे पठितब्राह्मणोपज्ञेन बार्हस्पत्यं मध्येति धायाहु
तिमाहुतिं हुत्वाभिघारयेद्यदि राजन्यः ऐंद्रं यदि वैश्यो वैश्वदेवमिति श्रुतं। तत्रापि पूर्ववद्ब्राह्मणाकर्तृक
त्वादिनिमित्तमेवपदिशाब्दश्रुतेः। राजसूयस्य त्रैवर्णिककर्तृकत्वेन ब्राह्मणादेः प्राप्तत्वाच्च। राजशब्दस्य
प्रजापालनकर्तरि सर्वलोकप्रसिद्धेः। क्षत्रियमात्रे द्रमिडप्रसिद्धेस्तन्म्लेच्छदेशस्य प्रसिद्धत्वेनासाध
कत्वात्। व्याकरणप्रसिद्धेस्तन्मूलकत्वेनानियामकत्वाच्च। सर्वलोकप्रसिद्धेः श्रौतपदिशब्दमूलकत्वाच्च।
अतो ब्राह्मणादिकर्तृकत्वे निमित्ते मध्ये निधानपूर्वकप्रत्याहुत्यभिघारणविशिष्टपंचहविष्केकेष्टिप्रयो
गो राजसूयांतर्गतो विधीयते। प्रत्येकप्रयोगश्च पंचानुलोमविषया इति बोध्यं एतयान्नाद्यकामं या
जयेदिष्टनेनोचोभयोरपि नित्यनैमित्तिकप्रयोगयोः फलार्थं बहिःक्रत्वनुष्ठानमिति न ब्राह्मणादि
गुणस्य भेदकत्वमिति प्राप्ते राजानमभिषिंचेदिति श्रुतौ राजोद्देशेनाभिषेकविधानादभिषेकाधिकारि

लराजन्ययोगात्प्रागेवराजशब्दस्यक्षत्रियवाचित्वप्रतीतेस्तस्यकर्मणीत्यधिकृतस्यपरस्यंतपुरोहि
तादिभ्योयक्इतिस्मृत्यापुरोहितादिगणपठिताद्राजशब्दाथगादिविधानेनचराज्यशस्यराजशब्दप्रसिद्धि
पूर्वकत्वावगतेर्ईमिउप्रयोगानुसारेणराजशब्दःक्षत्रियवचनएव।अतश्चावेष्टौब्राह्मणादीनांप्राप्त
भावाद्विधेयत्वावगतेःकृत्स्नरूपाद्गुणाद्वेष्टिप्रयोगांतरमेवपंचहविष्केकेष्टिरूपंसमस्तगुणविशिष्टंबहि
ःक्रतुविधीयते।तस्यचोक्तवचनेनान्नाद्यंफलं।अतःक्रतुतुप्रत्येकंपंचप्रयोगाएव।यद्यपिचार्वपक्ष
सिद्धांतयोःपंचहविष्केकेष्टिप्रयोगस्तुल्यस्तथापिब्राह्मणादिगुणस्यपूर्वपक्षेनभेदकत्वंसिद्धांतेतु
तदितिविशेषः।तत्प्रयोजनंचपक्षद्वयोपपादनेनैवोक्तं।नचैवंराजन्यवाक्येतस्यप्राप्तत्वाद्विधेयत्वा
भावेनभेदकत्वानापत्तिः।राजन्यपदस्याभिषिक्तानभिषिक्तक्षत्रियमात्रवाचित्वेनराजसूयेऽप्राप्त
स्यैवतस्यविधेयतयाभेदकत्वोपपत्तेः।राजसूयेहिराजपदस्यक्षत्रियमात्रशक्तस्यापिराजेसेतानभि

षिक्तानाञ्चक्षत्रइतिनिरूढलक्षणातात्पर्यग्राहकाल्लिंगादभिषिक्तक्षत्रियमात्रस्यैवाधिकारः। अतोसिद्धंत्र
ध्वपिवाक्येषुकर्तृरूपस्यगुणस्यसम्यक्प्रयोगभेदकत्वं· पदिशाद्यभिघारयेदितिलिङः प्रयोज्यत्वापरपर्या
यहेतुमदर्थकत्वेआख्यातद्वयैकवाक्यत्वेचतात्पर्यग्राहकः। तेनमध्येनिधानपूर्वकप्रत्याङ्गस्याभिघारण
प्रयोजकीभूतेब्राह्मणादिकर्तृकैर्यागैरिष्टंभावयेदितिवाक्यार्थोबोध्यः॥ ॥आधाने॥ ॥वसंतेब्राह्म
णोग्नीनादधीतग्नीष्मेराजन्यःशरदिवैश्यइतिश्रुतंतथावसंतेब्राह्मणमुपनयीतग्नीष्मेराजन्यंशरदि
वैश्यमितिच· तत्रसर्ववर्णसाधारणानांकर्तृणामाग्निविद्यासाध्यत्वादग्नेश्चउपायभूतस्याधान
स्यप्राप्तएवंविद्वानग्निमाधत्तइत्यनेनानन्याक्षिप्तशक्तिकेनाग्न्युद्देशेनाधानविधाविनाप्राप्तत्वा
दाधानेब्राह्मणादीनांप्राप्तेर्निमित्तार्थश्रवणं· ब्राह्मणकर्तृकत्वेनिमित्तेवसंतःकालआधानांगत्वेनविधीयते· अ
थयास्त्वेनस्योपसंभारान्संभरतीतिविध्यंतरशेषस्यवर्तमानापदेशतात्तथापिसंभारेष्वग्निमादधातीत्ययमाधानमाय

को विधिः। अत्र हि न संभरा विधेयाः प्रमाणांतरप्राप्तत्वात्॥ नापि तदधिकरणत्वं तस्मिन्नाधीयतामयमिति मंत्रवर्णा
देव प्राप्तत्वात्॥ अत आधानमात्रविधिरयं॥ अथ वाप्राप्ताधानानुवादेन कालविधिरात्मनेपदार्थस्यानाधातुरा
हवनापत्त्याभावत् पस्य च विधिरिति वाक्यभेदापत्तेर्जातपुत्रः कृष्णकेशोग्नीनादधीतेत्ययमाधानप्राय
को विधिः। उक्तवाक्ये तु अभ्युदयशिक्कतया मंत्रवर्णात् सर्वेमेवाधिकरणत्वविधिः। एवं च जातपुत्रवा
क्ये वयोवस्थाविशेषलक्षणापि नापद्यते॥ सर्वथा आधानप्राप्ते निमित्तार्थानि ब्राह्मणादिश्रवणानि
न भेदकानि॥ तथा विद्यासाधनतया अध्ययनं तत्साधनत्वेनोपनयनं चार्थप्राप्तं॥ अध्ययनस्य तु
स्वाध्यायोध्येतव्य इत्यनेन नियमोपि॥ अतः सर्वसाधारण्येन प्राप्तोपनयनोद्देशेन ब्राह्मणकर्तृक
त्वे निमित्ते वसंतः काले विधीयत इति प्राप्ते सर्वकर्तृकत्ववत्सर्वकालकत्वस्यापि॥ आधानादौ प्रा
प्तिसंभवेन ब्राह्मणकर्तृकत्वे निमित्ते कालविधिः काले वा निमित्ते कर्तृविधिरित्यत्र विनिगमना

विरहाद्भयविशिष्टाधानादिविधिरेव॰ उपनयनस्य च पक्षे संभवत्याग्निकत्वे न सुतरां विध्युप
पत्तिः। अत एव विनिगमनाविरहात्कर्तृकालादिरूपस्य प्रयोगान्वयिगुणस्य प्रयोगविध्याया
दकत्वावश्यंभावे एतद्विधिविहितप्रयोगानुवादेनैव जातपुत्रादिवाक्येषु वयोवस्थाविशि
ष्टकर्तृविधिः। आत्मनेपदार्थस्य चोत्पत्तिसाधनत्वरूपिणो गुणस्य श्रवणादुत्पत्त्यादिकमप्यत्रैव न तु
जातपुत्रादिवाक्ये वाक्यभेदापत्तेः। प्राथम्याद्वा ब्राह्मणवाक्ये एवोत्पत्तिः॰ इतरयोस्तु प्रयोगमा
त्रं॰ तेन सिद्धोऽत्रापि गुणात्सु योगभेदः। एतयोश्चाधानोपनयनयोरग्निविद्याफलकत्वे पित्र्यकरणे
प्रत्यवायादिश्रवणान्नित्यत्वमपि॰ एवं च स्वविधिप्रयुक्ताधानोपनयनजन्याग्निविद्यालाभे क्र
तुविधयो नाग्निविद्ये तदुपादानाय प्रयुंजत इति न तद्रहितस्य शूद्रादेरधिकार इति प्रयोजनं षष्ठे
वक्ष्यते॥ ॥अयनेषु॥ ॥दर्शपूर्णमासयोर्दाक्षायणयज्ञेन स्वर्गकामो यजेतेति श्रुतं तथा साकंप्र

भा०
२९

स्थाप्येन यजेत पशुकाम इति श्रुतं· तत्र दाक्षायणादिपदवाच्यस्य गुणस्य लोके अप्रसिद्धत्वादुद्भिदादि
वन्नामधेयत्वावगतेः संज्ञया अभ्यासाद्वा कर्मान्तरं विधीयते· फलसंबंधस्यापि सार्वकाम्यवाक्यवशाद्
वप्राप्तत्वेनान्यपरत्वाभावादिति प्राप्ते यद्यपि लोके गुणो न प्रसिद्धस्तथापि दक्षस्य यजमानस्येमे दाक्षा
ऋत्विजस्तत्कर्तृकमयनं प्रयोगावृत्तिर्यस्य यज्ञस्येति व्युत्पत्त्यावृत्तिपरत्वावगतेः साकंसहप्रस्थाने
यत्रेति व्युत्पत्त्या च सहत्वपरत्वावगतेर्नातिरिक्तशक्तिकल्पनया नामधेयत्वाध्यवसानं· अतो प्राप्तत्वा
वृत्तिरूपसहत्वरूपश्च गुण एव फलोद्देशेन विधीयते· आवृत्तिश्च कियतीत्यपेक्षायां दर्शपौर्णमा
स्योद्देशे अमावास्यया यजेतेति वाक्येन विशेषविधानाद्द्विरावृत्तिरेव· सहत्वं च प्रस्थानेकेनेत्यपेक्षायां
सह कुंभीभिरभिक्रामेदिति वचनात्कुंभीभ्यां· अनेनैव च वचनेन सहत्वाश्रयत्वं अभिक्रमणस्यावि
दधता अवान्तरप्रकरणाभावेपि तस्याश्रयत्वसिद्धिः· आवृत्तेस्तत्प्रकरणाद्दर्शपूर्णमासयोश्चेवाश्रयः।

अतोत्र संज्ञात्वाभावादनुपा■फलसंबंधपरत्वेन चाभ्यासाभावान्न कर्मांतरं। वस्तुतस्तु सर्वपदास्संज्ञा
या मगर इतिस्मृत्या संज्ञात्वाभावेण त्वानापत्ते दीक्षपणायज्ञपदे संज्ञात्वावश्यंभावेपि अवयवार्थप्रतीसायो
गरूढिस्वीकारादवयवार्थरूपाद्वृत्तिरप्राप्तत्वात्फलोद्देशेन विधीयत इति न विरोधः॥ ॥संस्कारस्थ॥।
ईषामालभेते चतुरो मुष्टीन्निर्वपतीत्येताभ्यां विहितयोर्दर्शपूर्णमासिकयोरीषालंभचतुर्मुष्टिनिर्वा
पयोरनुवादेनाऽनारभ्याधीताभ्यां वायव्यं श्वेतमालभेत भूतिकामः सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसका
म इत्येताभ्यां श्वेतचरूगुणौ विधीयेते। आलंभकर्माभूताईषाश्वेता कर्तव्येति। निर्वापश्च चरुशाल्ल
स्यस्यात्त्वां कर्तव्य इति सर्वेष्टक्षाणां च वायुसवैंधात्वाय व्यामित्यनुवादः। सौर्यमिति चाग्नेयस्येव तेजोदे
वतात्वसामान्यात्। न तु देवताविधिर्यागाश्रवणात्। उभयत्रापि फलपदं सार्वकाम्यप्राप्तफलप्रयोजक
त्वानुवाद इति प्रथमः पक्षः। द्वितीयस्तु फलपदवैयर्थ्यप्रसंगात्प्राकरणिका अयालाभेन च गुणफ

लसंबंधानुपपत्तेर्गुणविशिष्टं यावदुक्तं आलंभनिर्वापाख्यं कर्मान्तरमेव फलोद्देशेन विधीयत इति· सिद्धांतस्तु
वायव्यं सोर्यभिःत्यादितद्धितांतपदवैयर्थ्यापत्तेर्द्रव्यदेवतासंबंधानुमितो यागः एवालभतिनिर्वपतिधातुलक्षि
तो द्रव्यदेवताविशिष्टः फलोद्देशेन विधीयत इति· अतिदेशप्राप्तोच्चालंभनिर्वापो न विधायते॥ ॥विशये॥ ॥य
त्र तु न देवताश्रवणं तत्र न यागकल्पना अपि तु संस्कारमात्रविधानं यथाग्निहोत्रे वत्समालभेतेत्यत्रालंभमात्रं
वत्ससंस्कारकत्वेन विधीयते· आलभतेः स्पर्शमात्रवाचित्वात्॥ ॥संयुक्तस्तु॥ ॥आग्नेयो क्रते चरुमुपदधा
ति बृहस्पतेर्वा एतदन्नं यन्नीवारा इत्यत्र यजमानस्यान्नं बृहस्पतेः कथं स्याद्यदि न बृहस्पतिर्देवतेत्य
र्थाद्बृहस्पतेर्देवतात्वावगतेस्तैत्तरीपशाखायां वार्हस्पत्यसोमवनीति तद्धितपदयुक्तवाक्यशेषश्रवणाच्च द्र
व्यदेवतासंबंधानुमितयागविधानमेवेदं। तस्य चौषधद्रव्यकत्वेनाग्नेयातिदेशात्स्विष्टकृदादिप्राप्ति
पत्तिप्राप्तो चरुमुपदधातीत्यनेनोपधानं प्रतिपत्तित्वेन विधीयत इति प्राप्ते यद्यपि तैत्तरीयशाखायां तद्धि

तश्रवणं तथापि विध्यभावाद्विध्यंतरैकवाक्यत्वभंगापत्तेश्च नायं देवतातद्धितः। चरुमुपदधातीत्यनेन
चरुस्थं उिलनिष्पादकचरुसंस्कारकतयोपधानविधानात्तद्देवतानाकांक्षतया नार्थवादोन्नीतस्यापि
देवताविधेः कल्पनं· अत एव चर्वपेक्षितप्रकृतिद्रव्यस्यैव नीवाररूपस्य विधिकल्पनं· अतश्च बृह
स्पतेर्ब्राह्मणस्यान्नं नीवारा इत्येवंस्तुत्युपपत्तेर्न बृहस्पतेर्वैस्यपं देवताकल्पनद्वारा यागकल्पक इति सिद्धं
॥ ॥पात्नीवते॥ ॥त्वाष्ट्रं पात्नीवतमालभेतेत्यनेन द्रव्यदेवताविशिष्टं यागं विधाय पर्यग्निकृतं पात्नीवतमु
त्सृजंतीति श्रुतं· तत्रोभयदेवत्यस्य पूर्वयागस्याग्नेयं चतुर्धा करोतीतिवत् केवलपात्नीवतपदेना
नुवादायोगात्पर्यग्निकरणादेश्च विधेयस्य गुणस्यातिदेशेनैव प्राप्तत्वादितरांगपरिसंख्यायां च त्रैदोष्या
पत्तेः पर्यग्निकृतपदस्यानुवादत्वमंगीकृत्य कर्मांतरविधिरेवायमिति प्राप्ते प्रत्यभिज्ञानान्न कर्मांतरं· न चानुवादा
नुपपत्तिः। सत्यप्यग्नीषोमादिवत्त्वाष्ट्रपत्नीवतोर्व्यासज्यवृत्तिदेवतात्वे मनोतायामग्निशब्दवल्लक्षणयाभिधा

भा० ३१

31

नोपपत्तेः। वस्तुतस्तु पृथक्कृताद्धितश्च वपाद्दैवताद्द्वयमेवेदं· एकवाक्योपादानाच्च समुच्चयः। अतोऽधि
ष्ठ उपित्वयोर्माताऽस्थमातेति वच्छकात एव केवलेन पात्नीवतपदेनानुवादः। अतः सर्वकर्मानुवादेन
गुण एव विधीयते· न च विधेयाभावः। हृतपर्यग्निकरणत्वस्यैव क्तप्रत्ययांतार्थस्य विधेयत्वात्· तस्य च ग
ह मेधीयाऽऽपभागन्यायेन प्राकृतस्यैवातिदेशतः सर्वप्रवृत्त्या विधेयत्वात् स्रुक्स्तोपकारकत्वेन च तेनैव
नैराकांक्ष्यादनिर्देशाकल्पनेनोत्तरांगानामर्थादेव निवृत्तौ त्रैदोष्यानापत्तेः। हृतपर्यग्निकरण
त्वस्य च सर्वांगेषु कृतेषु संभवात्तान्यप्याक्षिप्यंते· न च क्तप्रत्ययबलेन प्रमाणांतरप्रमितत्वा
वगमादतिदेशाप्रतिबंधकत्वं· प्रोक्षिताभ्यामुलूखलमुसलाभ्यामित्यादौ प्रमाणांतराभावेपि एतद्विधिवि
धेयस्यापि क्तप्रत्ययेनोपात्तत्वेन बाधकाभावात्॥ ॥अद्रव्यत्वात्॥ ॥अनारभ्यश्रुतं एष वै हविषा
हविर्यजते यैदाभ्यं गृहीत्वा सोमाय यजते इति तथा परा वा एतस्यायुः प्राण एति योंऽशुं गृह्णातीति·

अत्र हविः सोमः स एव देवता स एव द्रव्यमिति प्रथमार्थवादस्यार्थः। प्राणो आयुर्मे योदामाभिवर्द्धतइ त्ति द्वि
तीयस्य॰ तत्र न तावदत्र ग्रहणमेव ज्योतिष्टोमे विधीयते॰ संस्काररूपस्य ग्रहणस्यावघातादिवदश्वदा
भ्यनामकत्वानुपपत्तेः। द्वितीयां तयोस्तु पोसंस्कार्यद्रव्यनामत्वांगीकारे तु अव्यभिचरितक्रतुसंबंधाभा
वान्न द्रव्यमात्रोद्देशेन ग्रहणविधिसंभवः। अतो द्रव्यदेवताविशिष्टयागांतरविधानमेवेदं॰ अदाभ्यपदेन
हिंसानर्हसोमाख्यद्रव्यस्यांशुपदेन च निर्यासद्रव्यस्याभिधानात् द्वितीयाच्चोभयत्र सक्तुन्यायेन॰ देव
तात्वे कत्र सोमोन्यत्र प्रजापतये स्वाहेति मंत्रवर्णात्प्रजापतिः। गृ क्रान्तिश्चाधेनुवाद्यो द्वितीये यागलक्ष
कः। तयोश्च यागयोः प्राकरणिकैतत्समानजातीयत्वे तरीपशाखास्य वाक्या ज्योतिष्टोमांगत्वमिति
प्राप्ते गृह्णातौ यागलक्षणायां प्रमाणाभावादाघवाक्ये गुणसंक्रान्तशक्तिनाविधिना ग्रहणस्यैव विधे
यत्वावगमाच्चोभयत्रापि ग्रहणमेवोक्तसंज्ञकं उक्तसंज्ञकद्रव्यसंस्कारकत्वेन चाविधीयते॰ एवं च वि

नियोगभंगोपिद्वितीयापानकल्पितोभवति॰ देवतातुसोमरूपाआद्यवाक्येग्रहणएवान्वेतीतिदेवतावि
शिष्टंग्रहणमेवतत्रविधीयते॰ द्वितीयेतुउपयामगृहीतोसिप्रजापतयेत्वाजुष्टंगृह्णामीतिमंत्रवर्णा
द्ग्रहणागतयादेवताप्राप्तिर्द्रष्टव्या॰ होममंत्रस्तूत्तरभावियागोपकारकत्वमादायनेयः। देवताविशिष्टग्रहणद्वये
चप्राकरणिकत्वासेनज्योतिष्टोमांगत्वस्यतदुपपाद्यत्वस्यचबोधोपपत्तेर्नकश्चिद्विरोधः। प्रयोजनंपूर्वपक्षे
यागस्यांगत्वाद्यथाशक्तिन्यायविषयत्वंसिद्धांतेप्रधानत्वान्नेति॥ ॥अग्निरुक्त॥ ॥अनारभ्यैवश्रुतंयएवंविद्वान
ग्निंचिनोतीति॰ तत्रचिनोतिनानाग्निसंस्कारार्थत्वेनचयनविधिरपितुअग्निसंज्ञकस्ययागस्यैवविधिः। अथातोग्नि
मग्निष्टोमेनानुयजंति। तमुक्थ्येनतमतिरात्रेणतंद्विरात्रेणेत्याद्युत्तरवाक्येषुअग्निष्टोमादियज्ञानामग्न्यनुयजनत
रूपगुणाम्नानात्॰ नहिअग्न्यनुयजनत्वमग्नेरयागत्वेवकल्प्यते। देवदत्तमनुगच्छतियज्ञदत्तइत्यादौतुल्यक्रि
यायोगएवानुशिष्टदर्शनात्॰ अतश्चाग्निसंज्ञकस्ययागस्यतस्मिन्नेववाक्येविधौगौरवापत्तेर्विद्वद्वाक्यएव

चिनोतिनालक्षणयातद्विधानं॰सचाव्यक्तत्वाज्ज्योतिष्टोमविकारः।उत्तरवाक्येश्चतस्यक्रत्वंगत्वसिद्धिः।इष्टका
भिरग्निंचिनुतइत्यनेनचयनस्यप्राप्तत्वाच्चिनोतिर्निर्वपतिवदनुवादश्चयनस्येतिप्राप्तेपाकमनुभुंक्तइत्यादौ
तुल्यक्रियायोगाभावेप्यनुशब्ददर्शनात्ततदनुरोधेनाग्निशब्दस्यचयनशब्दस्यचयागपरत्वकल्पनायुक्ता॰अ
तोविद्वद्वाक्येचयनमेवाग्निसंस्कारार्थंविधीयते॰अग्निशब्देनचयद्यपिशक्त्याज्वलनएवाभिधीयतेतथा
पितदर्थत्वेप्यर्थापत्तेर्निरूढलक्षणयाऽऽहवनीयादिपरत्वावसायात्तदुद्देशेनैवचयनंसंस्कारकतया
विधीयते॰संस्कारश्चसामर्थ्याच्चयननिष्पादितस्थण्डिलस्थापनरूपः।स्थापितस्याग्नेरुपयोगापेक्षायाम
थातस्तुतिवाक्येनतस्यज्योतिष्टोमांगत्वेनविधानं।तत्रहिअग्निशब्देनचयननिष्पादितस्थंडिलस्थापि
तोग्निश्चयनमेववालक्षणयाभिधीयते॰अग्निष्टोमशब्दश्चजातिन्यायेनसंस्थावचनोपिव्यक्तिन्याये
नज्योतिष्टोममेवप्रचरप्रयोगादभिधत्तेपार्थशब्दइवार्जुनं॰अतश्चज्योतिष्टोमत्वमेवलाघवादुद्देश्य

भा० ३२ 33

तावच्छेदकं नत्वग्निष्टोमसंस्थावत्त्वमपि। यद्यपि च चयनस्य ज्योतिष्टोमप्रयोगसंवलितत्वादनु
ष्ठानसादेश्यादेव तदंगत्वसिद्धिस्तथापि पशुकामश्चिन्वीतेत्यादिवाक्यैरग्नेः काम्यत्वावगमात्क्र
त्वंगत्वप्रतिप्रसवार्थं तन्त्वविरुध्यते। अपंचाग्निः प्रकृतौ अग्निः सोमांगं चेछतामित्यादिवचनाद्वै
कल्पिकः। अग्निं यक्ष्ये चोत्तरवेद्यांत्वग्निः स्यादयत इतिवचनादुत्तरवेद्यासमुच्चयः। तदभावे चोत्तरवेदि
मात्रं। उत्तरवेधामग्निं निदधातीतिवचनात्। अतश्च तमुकथ्येनेत्यादिवाक्यानि वैकल्पिकत्वात्तानविकृतिविशे
षे तन्नियमार्थानि चयनाश्रितरथेनाकारतादिफलार्थगुणानां प्राप्त्यर्थानि चेति दशमे वक्ष्यते॥ ॥प्रकर
णांतरे॥ ॥कौंडपायिनामयने उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति मासं दर्शपूर्णमासाभ्यामित्या
दि श्रुतं। तत्र जुहोति नाग्निहोत्रादिपदैश्च द्रव्यस्यापि विधिः उपस्थितत्वात्तदनुवादेन पदाहरनीयेजुहो
तीनिवन्मासादिन्त्यगुणविधिः। उपादेयपदनुपादेयस्यापि द्रव्यकर्मानुवादेनविधानेबाधकाभावात्क

र्दे वहुत्वकालादिरूपानेकगुणविशिष्टप्रयोगविधानाद्वनवाक्यभेदः अतोनकर्मांतरविधिः इतिप्राप्तेस
र्वत्रप्रवर्त्तकस्यविधेः कृतिविषयत्वपरपर्यायं उपादेयत्वं प्रमाणत्वाद्व्याज्ञातज्ञाप्यत्वाख्यंविधेयत्वंचप्रमेयं तदुभ
यमध्येकद्दत्तिसमानाभिधानश्रुत्यादिनाचधात्वर्थभावनाद्दत्तीत्युत्सर्गः। योग्योपपदसत्वेतुविशिष्टविधौ
रवभिपातन्नात्रद्दत्तिः यथापदाहवनीयेजुहोतीत्यत्राहवनीयस्योपादेयत्वविधेयत्वोभयाश्रयत्वाद्यो
ग्यत्वं अन्नएवतत्रधात्वर्थानुवादापेक्षायांइतरस्थानामपिसर्वहोमानांकथंचिदनुवादः। प्रकृतेतुमासस्या
नुपादेयत्वादुपादेयत्वंधात्वर्थएववाच्यं अतः स्तत्सामानाधिकरण्योन विधेयत्वमपितत्रैवेतिविहित
स्याविधानायोगाद्भेदः। एवंसत्यपिपदिमायंजुहोतीत्यादिवत्प्रत्यभिज्ञापकंसंन्निध्यादिप्रमाणंभवेत्त
तोगत्याकालादेर्विधेयत्वंकर्मणिचप्राप्तेष्पुपादेयत्वमितिवैयधिकरण्यमप्याश्रीयेत नत्वेतदस्ति न
चसंन्निध्याद्यभावेपिनाम्नएवपूर्वकर्मोपस्थापकता अग्निहोत्रंजुहोतीत्यनेनजुहोतिनाहियादृशी

विजातीयहोमत्वप्रकारिकाहोमोपस्थितिस्तादृश्येव संनिधिनोपनीतासु क्तंयत्सायं जुहोतीत्येतद्वाक्यस्थ जुहो
तेरपि स्वविषयविषयत्वमापाद्य यंतीभवति तत्र न विधेयपार्थकत्वप्रतिबंधिका· अग्निहोत्रादिनामतु अग्नि
देवताकहोमत्वप्रकारकहोमविशेष्यकबोधं जनयन्नू जुहोतेर्न द्रव्यकर्मोपस्थापकत्वमापादयितुं क्षमं·
न हि अग्निदेवताकं द्रव्यकर्मैवेत्यत्र प्रमाणमस्ति· विजातीयहोमत्वस्य नाम्नानुपस्थितेः। अन्यथा प
र्यायत्वेन सहप्रयोगानापत्तेः। अतिप्रसंगनिराकरणस्य प्राचीनप्रयोगाभावेनैवोद्भिदधिकरणे स्था
पितत्वेन योगरूढ्यनंगीकाराच्च· अन्यथा मत्वर्थलक्षणादिभिया अतिप्रसंगभंगार्थमपि रूढ्यंगी
कारे सोमादावपि तदापत्तेः। अतो न नाम्नातदुपस्थितिः। अत एव यत्र नाम्नैव धात्वनुपादेयगुण
योगेन श्रुतं न तु धातुर्यथा सर्वे भ्योदर्शपूर्णमासाविस्यादौ तत्र नामार्थस्यैवोपादेयत्वसामानाधि
करण्येन विधेयत्वप्रसक्तौ नामजन्योपस्थित्या तत्प्रतिबंधात्मकर्मांतरं अस्त्वेवातद्वाक्यस्य माकरणि

कत्वादकर्मांतरत्वं॰ अनः प्रकृते नाम्नाविधेयार्थकत्वस्य जुहोत्यादौ प्रतिबंधापोगादनुपादेयगुणयुक्तानुपस्थिति
रूपप्रकरणांन पातिदं कर्मांतरत्वं॰ अत्र चानुपादेयगुणयोगस्य स्वरूपस्योपादेयतापनपनद्वारापारिपोष्या
द्वालर्थवृत्त्युपादेयत्वापादनं व्यापारः। अनुपस्थितेरुपादेयत्वसामानाधिकरण्येन विधेयत्वाप्रतिबंधः। अतए
वनप्राचीनोक्ता अनुपादेयगुणयोगएव प्रयोजकोपितु उपादेयगुणसामान्याभावएवेतिध्येयं॰ अतः सिद्धंकाल
विशिष्टकर्मांतरविधानमेवेदं॰ एवं समरस्वत्सादक्षिणेनतीरेणाग्नेयोष्टाकपालइतिदेशरूपानुपादेयस्य॰ आग्ने
यपदस्यसमाधारणत्वेन पूर्वकर्मोपस्थापकत्वाभावात्॰ निमित्तस्य तु सत्रीपागर्य विश्वजितायजेतेति॰ आगू
रणं संकल्पः। तदुत्तरं सत्रमकुर्वतोयं विश्वजिन् विश्वजितायजेतेत्यस्मात्कर्मांतरं॰ नचानेन विनियुक्तस्यप्रयुक्तस्य
वातेनोत्पत्तिः। विनियोगादिसामानाधिकरण्योनावगतायाउत्पत्तेः संनिधिं विनावाधे प्रमाणाभावात्॥ अनेनवि
नियुक्तस्यप्रयुक्तस्यवातेनोत्पत्तिरिति॥ ॥फलंच॥ ॥फलस्याग्नेयमष्टाकपालं निर्वपेद्रुक्काम इति॰ संस्कार्यस्य

तुश्चौडुंवरीं प्रोक्षतीति व्रीहिप्रोक्षणात्कर्मांतरं॰ पंचैव यथानुपादेयानि तथा वाजपेयाधिकरणे कौस्तुभे
प्रपंचितं॥ ॥संन्निधौ॥ ॥पंचानामप्यनुपादेयानां संन्निधौ प्रत्युदाहरणानि॰ दर्शपूर्णमासप्रकर
णे पौर्णमास्यां पौर्णमास्या यजेत समे दर्शपूर्णमासाभ्यां यजेत यावज्जीवं दर्शपूर्णमासाभ्यां यजेत द
र्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति चतुर्णां॰ स्विष्टकृतं प्रकृत्य शेषात्स्विष्टकृते यजतीति शेषरूपसं
स्कार्यस्य॰ अत्र सर्वत्र संन्निधिनास्य विषयवृत्तिर्विधेयत्वप्रतिबंधात्प्राप्तस्यैव कर्मणः कालदेशविशि
ष्टप्रयोगविधिमात्रं विधिलाघवायानुमन्यते न तु कर्मोत्पत्तिमपि विधत्ते॰ यत्र तु प्रयोगोपि प्राप्तोपथाय इ
ष्ट्येत्यादौ तत्र प्राप्तप्रयोगानुवादेन कालादिमात्रविधिः। संभवति देशकालयोरुपादेयत्वासंभवेपि यागांगत्वेन विनि
योगविधिः। निमित्तस्थले तु मिथो निमित्तनैमित्तिकयो रंगांगित्वासंभवात्प्राप्तस्यापि कर्मणो निमित्तसंबंधानुमितया
पक्षयात्वर्थत्वेन विनियोगविधिरिति वक्ष्यते। फलसंस्कार्ययोस्तु न तूद्देशेन प्राप्तकर्मविनियोगविधिः स्पष्ट एव

व॰ अतो न संनिधिसत्वेनुपादेयगुणयोगेपि कर्मांतरं॥ ॥आग्नेयसूक्त॥ ॥कालद्वययोगे नाग्नेयं विधायप
दाग्नेयोष्टाकपालोमावास्यायां भवतीति श्रुतं तत्र कालद्वययुक्तादाग्नेयात्कर्मांतरविधानमिदं प्रकरणांतरा
दभ्यासाद्वा भेदोपपत्तेः। अनेनैव विहितस्येतरेण पौर्णमासीमात्रविधिरुक्त उत्पत्तिशिष्टकालावरोधान्नि
राकर्तव्यः। न चैकस्यैव कर्मणोभ्युदयशिरस्कतया विधिद्वयेन विधानं पिंगाक्ष्येकहायनीशब्दाभ्यामिव द्रव्यवि
शेषस्येति वाच्यः पिंगाक्ष्येकहायनीशब्दाभ्यामुपस्थितस्याप्येकस्यैकेन विधिना विधाने वा भाकाभावात्. प्रकृते
तु एकेन विहितस्येतरेण संभवतीति कर्मांतरमेव॰ अत एवामावास्यायामाग्नेयद्वयकरणं पूर्वपक्षप्रयोजनमि
ति प्राप्त एतस्येंद्राग्नविधिशेषत्वान्नस्यानंत्र्येणाविधायकत्वं॰ प्रशस्ताग्नेयसाहित्येन चैंद्राग्नप्रशंसा॰
अतो न कर्मांतरं॥ ॥इति श्रीखंडदेवकृतौ भाट्टदीपिकायां द्वितीयस्य तृतीयः॥ ॥यावज्जीविकः॥ ॥
यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेत्यत्र काम्य एव स्वर्गाद्यर्थे दर्शपूर्णमासकर्मणि जीवनपर्यायकालविधिः।

भा०
२६
36

नचपौर्णमास्यादिकालविरोधः व्याप्यव्यापकभावेन अमावास्यापराह्णादिवदुभयोरप्युपपत्तेः। अत एव विनि
गमनाविरहात्कालद्वयविधावपि प्रयोगद्वयविधिः। जीवनपर्याप्तकालविधिसामर्थ्यादेव च प्रतिपौर्णमास्याद्यथा
दर्शपूर्णमासावृत्तिः। अतश्चतावद्व्याप्यप्रयोगव्यासक्तव्यापकैकप्रयोगादेव स्वर्गादिफलमिति प्राप्ते कालल
क्षणापत्तेर्नायं कालविधिः। अतो धातुसंबंधाधिकारविहितणमुल्प्रत्ययेन जीवनस्य कर्मसंबंधावगतेः स्वावच्छि
न्नकालकक्षादिरूपसंबंधाश्रयणे च गुणभूतकालानुरोधेन प्रधानावृत्तेर्न्यायलभ्यत्वाभावेन यावच्छब्दार्थस्यापि वि
धेयत्वापत्तेर्लाघवान्निमित्तत्वमेव संबंधः प्रतीयते। तदा हि प्रतिनिमित्तं नैमित्तिकावृत्तेर्न्यायोपलभ्यत्वाद्यावच्छब्दार्थो
नुवादः। निमित्तत्वं च स्वान्वयव्यतिरेकानुविधाय्यवश्यानुष्ठानकर्तव्यत्वं यथा राहूपरागान्वयव्यतिरेकानुविधा
यि अवश्यानुष्ठानं यस्य स्नानस्य तद्वत्त्वं राहूपरागे। अत्र च व्यतिरेकानुविधानस्य सर्वत्र ज्ञापकप्रमाणाभावा
देव सिद्धेरन्वयानुविधान एव विधेस्तात्पर्यं। अतश्च निमित्तसत्त्वे नैमित्तिकस्यावश्यानुष्ठानबोधनादकरणे प्र

त्पवाप्यो नुमीयते· करणेच धर्मेण पापमपनुदनीत्यादिवाक्यशेषाद्वाग्निसत्रन्यायेन पापक्षपएवानुषं
गिको नित्यनैमित्तिकस्थले फलं·यत्र तु रथंतरसामत्वादिनिमित्तसत्वे नैमित्तिकस्यापाप्तदेव प्राप्तिसंभवेनान्वयानु
विधानस्यप्रमाणांतरेणप्राप्तिस्तत्र व्यतिरेकानुविधान एव विधेस्तात्पर्यं· अतएव रथंतराभावे ऐंद्रवायवाग्रत्वस्या
भावः। अतश्च यावज्जीवपदे लाघवाघनुरोधेन जीवनस्य निमित्तत्वावगतेस्तदनुरोधेन पापक्षपार्थविनियोगांतर
मेवेदमितिसिद्धं॥ ॥नमरूप॥ ॥ शाखाभेदेनाम्नातेग्निहोत्रादौ सत्स्वपि भेदकप्रमाणेषु न कर्मभेदः।भेदकप्रमा
णो हि स्ववाक्यस्य कर्मोत्पत्तिपरत्वावगते रुत्पन्नस्योत्पत्त्ययोगात्कर्मांतरत्वसिद्धिः।प्रकृते तु उक्तप्रमाणैः उत्पत्ति
परत्वावगमेपि पुरुषभेदात्तत्तच्छाखाध्यायि पुरुषान्प्रत्येकस्यैव कर्मणो त्पत्तिसंभवान्न कर्मभेदः। न हि सर्वाः
शाखाः सर्वपुरुषैरध्येयाः।स्वाध्यायविधावधर्युं वृणीत इतिवत्स्वीयत्वैकत्वयोर्विवक्षितत्वेनानेकशाखा
ध्ययमानुपपत्तेः।न चैवं वेदांतरस्य शाखाध्ययनस्याप्यनापत्तिः।वेदानधीत्येत्यादिवचनांतरानुरोधेन वेदत्रा

यगनैकैकशाखाध्ययनस्यैवावश्यकत्वावगतेः। अत एव वेदभेदे पुरुषाभेदादेकत्रैवोत्पत्तिरपरत्र गुणार्थश्र
वणमित्यत्र नियामकं वक्ष्यते। वेदैकत्वे तु प्रतिशाखं पुरुषभेदात्सत्यपि सर्वेषामुत्पत्तिपरत्वेन कर्मभेदः। अत ए
वैकस्मिन्कर्मणि विरुद्धानां नानाशाखागतांगानां विकल्पः। स च न तत्तत्पुरुषभेदेन व्यवस्थितः। तत्तदंगानां त
त्तदध्येत्रर्थत्वे प्रमाणाभावेन प्रकरणाच्छुद्धक्रत्वर्थत्वावगतेः। अविरुद्धांगेषु तु समुच्चयः। शाखांतरीयांगज्ञानं
च कल्पसूत्रादिभिः सुलभं। यत्तु बह्वल्पं वा स्वगृह्योक्तमित्यादिवचनं तत्सर्वांगोपसंहारासंभवे तु कल्पविधाना
र्थमिति कौस्तुभे द्रष्टव्यं। तदेवं शब्दांतराभ्याससंख्यासंज्ञागुणप्रकरणांतरैर्निरूपितः कर्मणां भेदः। अतः परं
तेषां विनियोगो निरूपयिष्यते॥ ॥इति श्रीखंडदेवकृतौ भाट्टदीपिकायां द्वितीयाध्यायस्य चतुर्थः पादः॥